॥ अथ ॥

॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृत—"वेदार्थप्रकाश"—नामभाष्यसहितम् ॥

(अथ भाष्योपक्रमः)

॥ ॐ नमः श्रीगणेशाय नमः[1] ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥१॥
यस्य निःश्वसितं[2] वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥२॥
तत्कटाक्षेण तद्रूपं दधतो बुक्कभूपतेः[3] ।
कृतावतरणः[4] क्षीरसागरादिव चन्द्रमाः ॥३॥
विजितारातिव्रातो[5] वीरः श्रीहरिहरः क्षमाधीशः ।

१— ड-पुस्तके एतदनन्तरमेष श्लोकोऽधिकः—
"श्रुतिपङ्कजार्थलक्ष्मीं यो विकासयति हृद्गतः ।
स पायात् सच्चिदानन्दः सूर्यमण्डलगो हरिः"—इति ।
२— 'निश्वसितं'—इति ज, झ, ञ, ट । ३— 'बुकभूपतेः'—इति ज, झ ।
४— 'कृतेचेतरणः'—इति ज, ञ, ट । ५— 'विजिताराजतेजातो'—इति ज, झ, ञ, ट ; 'विजितारिजनो जातो'—इति ड ।

धर्म्मब्रह्माध्वर्य्यः[1] समादिशत्सायणाचार्य्यम्[2] ॥४॥
ऋग्यजुः[3]सामशाखाना मेकैका व्याकृता त्वया ।
तावता तत्समानार्था ज्ञातुं शक्यास्ततः पराः ॥५॥
वासना विशदा[4] यत्र मन्त्रार्थाना मशेषतः ।
प्रायेणाध्वर्यवं कर्म्म पूर्णं[5] शाखान्तरैर्विना ॥६॥
करामलकवद्यत्र परं तत्त्वं प्रकाशितम् ।
या काचित्तादृशी शाखा त्वया व्याख्यायता मिति ॥७॥
सर्वतः[6] सायणाचार्य्यो विमृश्योदीरितान् गुणान् ।
माध्यन्दिने शतपथे ब्राह्मणे व्याकरोति[7] तत् ॥८॥
सस्कारः पदवाक्यार्थन्यायानां दर्शितः पुरा ।
वेदाना मर्थवत्त्वादि यच्चान्यदुपयुज्यते ।... ...
सर्वशाखासमत्वेन विज्ञेयं तदिहाखिलम् ॥९॥
यच्च[8] सन्दिग्ध मज्ञात मत्र तद्विवरिष्यते[9] ।
सम्मत्या कल्पसूत्राणां ब्राह्मणानाञ्च सङ्ग्रहात् ॥१०॥

१— 'धर्मशाह्माचार्यः'—इति ज, झ, ञ, ट; 'धर्मब्रह्माचार्यः'—इति ड
२— 'समादिशत्सायणाचार्य्यः'—इति ज, झ, ञ, ट ।
३— 'स ऋग्यजुः'—इति ज, झ, ञ, ट ।
४— 'वासनादिशदा'—इति ज, झ, ट ; 'वासनादि सदा'—इति ञ, ड ।
५— 'कर्म पूर्ण'—इति ज, झ, ञ ; 'कर्मापूरि'—इति ड ।
६— 'सर्वज्ञः'—इति ड ।   ७— 'व्याख्याकरोति'—इति ज, झ, ञ, ट ।
८— 'यत्र'—इति ज, झ, ञ, ट ; 'यत्तु'—इति ड ।
९— 'तद्वि परीक्ष्यते'—इति ठ, ड ।

-(अथ प्रथमकाण्डीय-प्रथमप्रपाठक-प्रथमब्राह्मणस्यावतरणी)

इह हि चरमे चतुर्दशे काण्डे करतलामलकवत् परतत्त्वं प्रकाशितम्, ततः प्राक्तनैस्तु त्रयोदशभिः काण्डैस्त्रेताग्निसाध्यो[१] धर्मः प्राधान्येन प्रतिपादितः। अन्याधाने[२] अग्नयश्चाधानपवमानेष्टिभिर्निष्पाद्याः; पवमानेष्टयश्च दर्शपूर्णमासविकृतितया[३] तदधिगमसापेक्षज्ञाना इति प्रथमे काण्डे दर्शपूर्णमासौ प्रतिपाद्येते; तदनुष्ठानारम्भश्च पूर्णमासपूर्वकः[४]; अतश्च तस्य पूर्णमासस्य प्रथमं यदङ्गं व्रतोपायनं[५] तदङ्गत्वेनापा मुपस्पर्शनं विधत्ते—

१— "दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः।
अग्नित्रय मिदं त्रेता प्रणीतः संस्कृतोऽनलः॥"—इति अम० को०
[illegible] "त्रेता त्वग्नित्रये"—इति च तत्रैव ३. ३. ६८।

२— नास्त्येतत् पदं ठ-पुस्तके।

३— 'दर्शपूर्णमासविध्यन्तग्राहितया'—इति ठ; 'दर्शपूर्णमासप्रकृतितया'—इति ड; 'दर्शपूर्णमासविप्रकृतितया'—इति ज, झ, ञ, ट।

४— 'पूर्णमासपूर्वकम्'—इति झ-ञ-टातिरिक्तेषु।

५— व्रतोपायनम् = व्रतग्रहणम्। "व्रतशब्देन कर्माङ्गभूता शास्त्रतो नियमा उच्यन्ते। "कर्माङ्गभूता यमनियमा व्रतम्, तदुपगमार्थो 'अग्ने व्रतपते'—इत्ययं मन्त्रः"—इत्युक्तं तन्त्ररत्ने"—इति का० २. १. ११ सू० वृ०। तच्च दर्शपौर्णमासयोः अन्यन्वाधानानन्तरं भवति, पशौ तु ब्रह्मवरणानन्तर मिति विशेषः। विहितश्चैतत् कात्यायनेन "अपराह्णे व्रतोपायनीय मश्नीतः"—इत्यादिसूत्रद्वयेन (२. १. १०, ११.)। "अशन मन्यन्वाधानं व्रतोपायन मित्येके, व्रतोपायन मशन मन्यन्वाधान मित्येके, अन्यन्वाधानं व्रतोपायन मशन मित्येके (श्रौ० सू० ४. २. ८.)"—इत्यापस्तम्बग्रन्थश्चेह द्रष्टव्यः। तद्विधानं तु तत्रैव मुक्तम्—"दक्षिणेनाहवनीय मव-

स्याय व्रत मुपैष्यन् समुद्रं मनसा ध्यायति, अथ जपति 'अग्ने व्रतपते व्रतं चरिष्यामि'—इति ब्राह्मणः"—इत्यादि (आप० श्रौ० सू० ४. ३. १,२.)। अत्र पद्धतिः—"कृताधानस्याधानानन्तरं प्रथमपौर्णमास्यां मातृपूजा-पूर्वक माभ्युदयिकं श्राद्धम्। ततो मुख्याया मेव पौर्णमास्यां सद्यो ऽन्वा-रम्भणीयेष्टिः। तदनन्तरं पौर्णमासस्यारम्भः। समूहन्त्यग्न्यागारम्, × × ×। अथाग्न्यन्वाधान मुच्यते × × ×। यजमानस्य सपत्नीकस्य मांसमैथुनवर्जनसङ्कल्पः। केशश्मश्रुवपनं शिखां वर्जयित्वा × × ×। अपराह्णे पत्नीयजमानौ माषमांसलवणप्रातर्होष्यमाणद्रव्यव्यतिरिक्तं घृत-संयुक्त मल्प मश्नीतौ, न तृप्तिपर्यन्तम्। × × ×। व्रताशनानन्तरं यजमानः स्फ्य मादाय गार्हपत्यदक्षिणाग्न्योरन्तरालेन गत्वा आहवनी-यस्य पश्चात् समीपे पूर्वाभिमुखस्तिष्ठन्नाहवनीयं विलोकयन्नुदकं दक्षिण-हस्तेन स्पृष्ट्वा 'अग्ने व्रतपते व्रतम्'—इतिमन्त्रेण व्रत मुपैति, सत्यवदनादि-नियम मङ्गीकरोतीत्यर्थः। अथवा इदमहम............... च मुपैति, न पूर्वोक्तेन। अतः प्रभृति क्रियमाणकर्माङ्गभूतो यजमानस्य सत्यवदननियमः। रात्रौ तस्मिन्नेव विहारे स्वय मेवाग्निहोत्रहोमः। सायाशनेच्छायां सत्यां होमानन्तर मारण्यौषधीनां नीवारश्यामाककङ्गु-दीना मन्नं वा आरण्यवृक्षाणा माम्रराजादनादीनां फलानि वाश्नीयात्; नाश्नीयाद्वा। रात्रावाहवनीयागारे गार्हपत्यागारे वा पत्नीयजमानाभ्यां खरस्याग्न्यपेक्षया अधो नीचं शयनं कर्त्तव्यम्। आस्तरणस्य न निषेधः। × × ×। प्रातरपि तस्मिन्नेव विहारे स्वय मेवाग्निहोत्रहोमः। तत उदिते सूर्ये ब्रह्मवरणाद्युपक्रमः"—इति।

॥ अथ प्रथमकाण्डम् ॥

(तत्र)

प्रथमाध्याये (प्रथमप्रपाठके)

प्रथमब्राह्मणम् ।

॥ हरिः ॐ ॥

व्रत मुपैष्यन्* । अन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङ् तिष्ठन्नप ऽउप†स्पृशति तद्यदप ऽउपस्पृशत्यमेध्यो वै पुरुषो यदनृतं वदति तेन पूतिरन्तरतो मेध्या वा ऽआपो‡ मेध्यो भूत्वा व्रत§ मुपायानीति पवित्रं वा ऽआपः पवित्रपूतो व्रत मुपायानीति तस्माद् वा ऽअप ऽउपस्पृशति ॥ १ ॥

सोऽग्नि मेवाभीक्षमाणो व्रत मुपैति । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यता मित्यग्नि-र्वै देवानां व्रतपतिस्तस्मा ऽएवैतत् प्राह व्रतं चरि-

* 'व्रत मुपैष्यन्'—इति च । एवं स्वरपाठभेदे स्यान्मुद्राशुद्धिरेव हेतुः ।

† 'प ऽउप'—इत्येवमादिषु 'ऽ'—इति चिह्नं नास्ति ग-च-छ-पुस्तकेषु ।

‡ 'वा ऽआपो'—इत्येवमादिषु च 'ऽ'—इति चिह्नं ग-छ-पुस्तकयोर्नास्ति ।

§ 'व्रत'—इति एकवकारात्मकः पाठः ख-च-पुस्तकयोः । सर्वत्रैवं बोध्यम् ।

ष्यामि तच्छकेयं तन्मे राध्यता मिति नात्र तिरोहित मिवास्ति* ॥ २ ॥

अथ सꣳस्थिते विसृजते† । अग्ने व्रतपते व्रत मचारिषं तदशकं तन्मे ऽराधीत्यशकद्ध्येतद् यो यज्ञस्य सꣳस्था मगन्नराधि ह्यस्मै यो यज्ञस्य सꣳस्था मगन्नेतेन न्वेव भूयिष्ठा ऽइव व्रत मुपयन्त्यनेन त्वेवोपेयात् ॥ ३ ॥

द्वयं वा ऽइदं न तृतीय मस्ति । सत्यं चैवानृतं च सत्य मेव देवा ऽअनृतं मनुष्या ऽइद महमनृतात् सत्य मुपैमीति तन्मनुष्येभ्यो देवानुपैति ॥ ४ ॥

स वै सत्य मेव वदेत् । एतद्ध वै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ते यशो यशो ह भवति य ऽएवं विद्वान्त्सत्यं वदति‡ ॥ ५ ॥

अथ सꣳस्थिते विसृजते । इद महं य ऽएवास्मि सोऽस्मीत्यमानुष ऽइव वा ऽएतद्भवति यद्व्रत मुपैति न हि तदवकल्पते यद् ब्रूयादिद महꣳ सत्यादनृत मुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिद महं य ऽएवास्मि सोऽस्मीत्येवꣳ§ व्रतं विसृजेत ॥ ६ ॥

अथातोऽशनानशनस्यैव । तदु हाषाढः सावयसो

---

* 'मिवास्ति'--इति ख ।
† 'विसृजते'--इति ख, च ।
‡ 'वदति'--इति ख, 'वदति'--इति ग, च ।
§ 'सोऽस्मीत्येव'--इति ख, च ।

ऽनशन मेव व्रतं मेने मनो ह वै देवा मनुष्यस्या जानन्ति त ऽएन मेतद् व्रत मुपयन्तं विदुः प्रातर्नो यक्ष्यत ऽइति तेऽस्य विश्वे देवा गृहानागच्छन्ति ते ऽस्य गृहेषूपवसन्ति स ऽउपवसथः* ॥ ७ ॥

तन्वेवानवक्लृप्तम्। यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वोऽश्नीयात् तस्मादु नैवाश्नीयात् ॥ ८ ॥

तदु होवाच याज्ञवल्क्यः। यदि नाश्नाति पितृदेवत्यो भवति यद्यु ऽअश्नाति देवानत्यश्नातीति स यदेवाश्नि[illegible]शितं तदश्नीयादिति यस्य वै हविर्न गृह्णन्ति तदशित मनशितꣳ स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति ॥ ९ ॥

स वा ऽआरण्य मेवाश्नीयात्। या वारण्या ऽओषधयो यद्वा वृक्ष्यं तदु ह स्माहापि बर्कुर्वार्ष्णो माषान्मे पचत न वा ऽएतेषाꣳ हविर्गृह्णन्तीति तदु तथा न कुर्याद् व्रीहियवयोर्वा ऽएतदुपजं† यच्छमीधान्यं तद् व्रीहियवावेवैतेन भूयाꣳसौ करोति तस्मादारण्य मेवाश्नीयात् ॥ १० ॥

* 'उपवसथः'—इति च। † 'दुपचं'—इति ड, सायणसम्मतश्च।

स ऽआहवनीयागारे वैताᳬ रात्रिᳬ शयीत। गार्हपत्यागारे वा देवान्वा ऽएष ऽउपावर्त्तते यो व्रतमुपैति स यानेवोपावर्त्तते तेषा मेवैतन्मध्ये शेते ऽधः शयीताधस्तादिव हि श्रेयस ऽउपचारः* ॥ ११ ॥

स वै प्रातरप ऽएव। प्रथमेन कर्म्मणाभिपद्यते ऽपः प्रणयति यज्ञो वा ऽआपो यज्ञ मेवैतत् प्रथमेन कर्म्मणाभिपद्यते ताः प्रणयति यज्ञ मेवैतद्वितनोति ॥ १२ ॥

स प्रणयति। कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्तीत्येताभिरनिरुक्ताभिर्व्याहृतिभिरनिरुक्तो वै प्रजापतिः प्रजा[illegible]पति मेवैतद् यज्ञं युनक्ति ॥ १३ ॥

यद्वेवापः प्रणयति। अद्भिर्वा ऽइदᳬ सर्वं माप्तं तत्प्रथमेनैवैतत्कर्म्मणा सर्वं माप्नोति ॥ १४ ॥

यद्वेवास्याच। होता वाध्वर्युर्वा ब्रह्मा वाग्नीध्रो वा स्वयं† वा यजमानो नाभ्यापयति तदेवास्यैतेन सर्वं माप्तं भवति ॥ १५ ॥

यद्वेवापः प्रणयति। देवान् ह वै यज्ञेन यजमानांस्तानसुररक्षसानि ररक्षुर्न्न यक्ष्यध्व‡ ऽइति तद्यदरक्षंस्तस्माद्रक्षाᳬसि ॥ १६ ॥

---

* 'उपचारः'—इति ख,च। † 'खयं'—इति च। ‡ 'यच्यध्व'—इति क।

ततो देवा ऽएतं वज्रं ददृशुः । यदपो वज्रो वा ऽआपो वज्रो हि वा ऽआपस्तस्माद् येनैता यन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत* एतं वज्र मुदयच्छंस्तस्याभये ऽनाष्ट्रे निवाते यज्ञ मतन्वत तथो एवैष एतं वज्र मुद्यच्छति तस्याभये ऽनाष्ट्रे निवाते यज्ञं तनुते तस्मादपः प्रणयति ॥ १७ ॥

ता उत्सिच्योत्तरेण गार्हपत्यꣳ सादयति । योषा वा ऽआपो वृषाग्निर्गृहा वै गार्हपत्यस्तद् गृहेष्वेवैतन्मिथुनं प्रजननं क्रियते वज्रं वा ऽएष उद्यच्छति यो ऽपः प्रणयति [illegible] वा ऽअप्रतिष्ठितो वज्र मुद्यच्छति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥ १८ ॥

स यद्गार्हपत्ये सादयति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद् गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति तथो हैन मेष वज्रो न हिनस्ति तस्माद् गार्हपत्ये सादयति ॥ १९ ॥

ता ऽउत्तरेणाहवनीयं प्रणयति । योषा वा ऽआपो वृषाग्निर्मिथुन मेवैतत्प्रजननं क्रियत ऽएव मिव हि मिथुनं कॢप्त मुत्तरतो हि स्त्री पुमाꣳस मुपशेते ॥ २० ॥

ता नान्तरेण सञ्चरेयुः । नेन्मिथुनं चर्यमाण मन्त-

* 'तत्त'—इति ग-घ-पुस्तकाभ्या मन्यत्र

रेण सञ्चरानिति ता नातिहृत्य सादयेन्नो ऽअनाप्ताः सादयेत्स यदतिहृत्य सादयेदुस्ति वा ऽअग्नेश्चापाश्च विश्रातव्य मिव स यथैव ह तदग्नेर्भवति यत्रास्याप ऽउपस्पृशन्त्यग्नौ ह्यधि श्रातव्यं व्वर्द्धयेद्यदतिहृत्य सादयेद्यदु ऽअनाप्ताः सादयेन्नो हाभिस्तं काम मभ्यापयेद्यस्मै कामाय प्रणीयन्ते तस्मादु सम्प्रत्येवो- त्तरेणाहवनीयं प्रणयति ॥ २१ ॥

अथ तृणैः परिस्तृणाति । द्वन्द्वं पात्राण्युदाहरति शूर्पं*ञ्चाग्निहोत्रहवणीञ्च स्फ्यञ्च कपालानि च शम्याञ्च कृष्णाजिनं चोलूखलमुसले दृषदुपले [illegible] वै व्विराड्विराड् वै यज्ञस्तद्विराज मेवैतद्यज्ञ मभिस- म्पादयत्यथ यद् द्वन्द्वं द्वन्द्वं वै व्वीर्यं यदा वै द्वौ सᳪर- भेते ऽअथ तद्वीर्यं भवति द्वन्द्वं वै मिथुनं प्रजननं मिथुन मेवैतत्प्रजननं क्रियते ॥ २२ ॥ १ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा प्रथमम्)
ब्राह्मणम् ॥ १ । १ ॥

---

* 'सूर्पं'—इति ख ।

मत मुपैष्यन्निति। पूर्णमासस्य प्राथम्यम्; अत्रैवाग्रे पौर्णमासप्रयोग मभिधाय पश्चाद् दर्शप्रयोगाभिधानात्। कात्यायनेनापि तथा-भिधाय "पौर्णमासवदन्यत्"-इति[१] पौर्णमासतन्त्रस्य दर्शेऽतिदेशात्। तथा इहैव ब्राह्मणे[२] प्रजापतिपर्वसन्धानप्रस्तावे "पौर्णमासेन चैवा-मावास्येन[३] च पौर्णमासीञ्चामावास्यां च तत्पर्वाभिषज्यन्"-इति पौर्णमासप्राथम्यम्[४]। तथा तैत्तिरीयके[५]—"पौर्णमासꣳ हविरिद मेषां मय्यामावास्यꣳ हविरिद मेषां मयि"-इत्यन्वाधानानुमन्त्र-णयोर्यजमानमन्त्रयोः पाठक्रमादपि पौर्णमासप्राथम्य मवगम्यते।

ननु पूर्वोऽयं पाठक्रमः श्रुत्यैव तु पौर्णमासप्राथम्यं प्रतिषिध्यते, श्रुतिश्च पाठाद्बलीयसी; श्रुत्यर्थपाठमुख्यस्थानप्रवृत्तीनां[६] क्रमप्रमा-[illegible]—"स्येन प्राबल्यात्[७]। श्रूयते हि पौर्णमासप्राथ-म्यस्य निन्दा—"यत्पौर्णमासीं पूर्वा मालभेत, प्रतिलोम मेवैनावा-

१— श्रौ० सू० ४. २. ४४। २— उपरिष्टात् (१. ६. ३. ३६.)।

३— 'चामावास्येन'-इति भ, ट। ४— 'प्राथम्यात्'-इति ट।

५— ब्रा० ३. ७. ४. ८। तन्मन्त्रपाठस्तु इमा मूर्जं मित्यादिः।

६— 'श्रुत्यर्थपाठमुख्यार्थानां प्रवृत्तीनां'-इति ञ, भ, ञ, ट, ड।

७— 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य मर्थवि-प्रकर्षात्"-इति मी० सू० ३. ३. १४। "विरोधेऽर्थस्तत्परत्वात्। श्रुतिः क्रमादानुमानिकत्वात्"-इत्यादिः (१. ५.५-१०सू०) कात्यायनग्रन्थोऽप्यत्र पर्यालोच्यः। "अङ्गबोधकप्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमा-ख्याभेदेन षट्"-इत्यादिश्च मीमांसापरिभाषाप्रबन्धः। "एतस्य विधेः (विनियोगविधेः) सहकारिभूतानि षट् प्रमाणानि"-इत्यादिना लौगाक्षिभास्करेणाप्यर्थसङ्ग्रहे यानि लक्षणोदाहरणानि प्रदर्शितानि, तानि चेह द्रष्टव्यानि।

लभेत"-इति[१], न[२]; तस्य वाक्यस्य "सारस्वतौ होमौ पुरस्ताज्जुहुया-दमावास्या वै सरस्वत्यनुहोम मेवैनावालभते"-इति[३] सारस्वत-होमविधिशेषत्वेन पौर्णमासप्राथम्यनिन्दार्थवादात्। अतस्तदुक्तरीत्या[४] पौर्णमासप्राथम्य मुपपन्नम्। उपस्पर्शनशब्देनाचमनं विवक्षितम्।

नन्वापस्तम्बेन[५] "अप आचामत्युपस्पृशति वा"-इत्याचमनप्रतिद्वन्द्विभावेनोपस्पर्शनाभिधानात् स्पर्शनमात्रं तत्प्रतिभाति। सत्यं तत्र तथा; इह तु "तेन पूतिरन्तरतः"-इति वाक्यशेषादपोऽश्नात्यन्तरत एव मेध्यो भवतीति वदताचमन मेव। यथा "अक्ताः शर्करा उपदधाति"-इत्यत्र घृततैलादिष्वञ्जनसाधनत्वेन सन्दिह्यमानेषु "तेजो वै घृतम्"-इति वाक्यशेषात्[६] घृत मिति निश्चयः, तद्वत्। सूचितं हि[७]—"सन्दिग्धेषु वाक्यशेषात्"-इति[८]। तत्र [illegible]। [illegible]त्वम्, उपैष्यन्निति शतृप्रत्ययेन व्रतोपायनस्याचमनं प्रति हेतुत्वाभिधानात्; "लक्षणहेत्वोः क्रियायाः"-इति स्मृतेः[९]। प्रधानं हि स्वनिष्पत्त्यर्थ मङ्ग मनुष्ठापयन् तदनुष्ठाने हेतुर्भवति। न च लक्षणेऽपि शतुर्विधानात् कथं हेत्वर्थनिश्चय इति वाच्यम्। तदा हि भविष्यता व्रतेन लक्षितो हि यः तत्पूर्वकालः, तत्सम्बन्ध माचमनस्य

१— तै॰ सं॰ ३. ५. १. ५।
२— नास्त्येतत् पदं ज-झ-ञ-ट-पुस्तकेषु।
३— तै॰ सं॰ ३. ५. १. ६।
४— 'अत उक्तरीत्या'-इति ट।
५— श्रौ॰ सू॰ ४. ३. २. ९।
६— "शर्करा अक्ता उपदध्यात्; तेजो वै घृतम्"-इति तै॰ ब्रा॰ ३. १२. ५. १२।
७— 'च'-इति ड; ज-झ-ञ-ट-पुस्तकेषु नास्त्येव।
८— मी॰ सू॰ १. ४. २९।
९— पा॰ सू॰ ३. २. १२६।

विधातुं व्रत मुपैष्यन्नित्येतस्मात्। तत्कालसम्बन्धस्याचमनानन्तरं व्रतो-पायनस्य विधानात् पाठादपि सिध्यतीति लक्षणार्थस्वीकारे वदन मनर्थक मिति।

ननु व्रतोपायनादपि प्रथम माहवनीयप्रणयन मन्वाधानञ्च। अत एवापस्तम्बः—"प्रातरग्निहोत्रं हुत्वान्य माहवनीयं[1] प्रणीयाग्नी-नन्वादधाति"—इति[2]। कात्यायनस्त्वप्रणीतस्याहवनीयादेरन्वाधाना-सम्भवादर्थसिद्धं प्रणयनं मत्वा[3] अन्वाधान मेव प्रथम माह—"अग्न्य-न्वाधान मध्वर्युर्यजमानो वा"—इति[4]। ब्राह्मणं तु तदनभिधाय ततः पराचीनं[5] व्रतोपायनं तदङ्ग माचमनं वा कथं प्रथमम् अभि-दधाति[6]? अत्राभिधीयते—नियमेन याजमानानां मध्ये व्रतो-[illegible] अग्न्यन्वाधानं हि नियमेन न याजमानम्। अध्वर्युर्यजमानो वेति कात्यायनोक्तेः[7]।

नन्वन्वाधानमन्त्रस्य ममाग्ने वर्च इत्यस्य[8] प्रत्यगाशीष्ट्वान्नियमेन याजमानत्वं युक्तम्; यथा आयुर्दा अग्नेऽस्यायुर्मे देहीत्यादेः[9]। तस्य हि समाख्यया आध्वर्यवत्वप्राप्तावपि प्रत्यगाशीष्ट्वलिङ्गेन प्रबलेन समाख्यां बाधित्वा याजमानत्वं निर्णीतम् "मन्त्राश्चाकर्मकरणास्त-

१— 'हुत्वाहवनीयं'—इति ठ। २— औ० सू० १. १. २।
३— 'मन्वानो'—इति ड; ज-झ-ञ-ट-पुस्तकेषु नास्त्येव।
४— औ० सू० २. १. २। ५— 'परत्वेन'—इति ठ, ड
६— 'आह'—इति झ, ञ, ट। ७— औ० सू० २. १. २।
८— का० औ० सू० २. १. ३. — तै० सं० ४. ७. १४. १।
९— तै० सं० १. ५. ५. १३।

दत्''-इति[1]। सत्यम्! अकरणमन्त्रत्वात् तत्र[2] तथास्तु, समाग्ने वर्च इति तु करणमन्त्रत्वादाध्वर्यवक्रियायां विनियुक्तत्वाद् यजमानेन प्रयोगे तत्प्रतिपादनासामर्थ्यादध्वर्युणैव प्रयोज्य मित्युक्त मुत्तराधिकरणे— "करणेध्वर्यवत्वात्"-इति[3]। अत उक्तयुक्तेस्तत्करण मन्वाधान मप्यध्वर्युणैवानुष्ठेयम्। यत्तु कात्यायनेनाध्वर्युर्यजमानो वेत्युक्तम्, तच्च याजमानत्वं शाखान्तरमूलत्वम्; एतच्छाखानुसारेण त्वापस्तम्बादिभिः केवलाध्वर्यवत्व मुक्त मिति विभागः[4]। अथवा यथा अप्रणीतस्यान्वाधानानुपपत्त्या प्रणयन मप्यन्वाधानविधिनैव सङ्गृहीतं कात्यायनसूत्रे, तथा अन्तरेणाहवनीयञ्च गार्हपत्यं च प्राङ् तिष्ठन्निति वचनादेवाग्निप्रणयनं तत्प्रबलीकरणरूप मन्वाधानं चार्थसिद्धत्वादनुक्त मित्युच्यमानाङ्गमध्ये व्रतोपायनस्य प्राथम्य म[illegible]

विहित मुपस्पर्शन मनूद्य प्रशंसति— "तद्यदिति। 'तत्' प्रकृतं 'यत्' उपस्पर्शनं तेनान्तरतः 'पूतिः' पवित्रता भवति। अनृतवदनेन हि पुरस्तात् सम्भावित मपवित्रत्व मिति।

ननूपस्पर्शनस्य फल मेवेदं[5] पवित्रत्वं किं न विधीयते; कथमपि सम्बन्धाभावेऽपि हि फलविधित्वं दृष्टम्, यथा—"प्रतितिष्ठन्ति य एता रात्रीरुपयन्ति"-इति रात्रिसत्रे[6]। (अत्रोच्यते[7]—) रात्रिसत्रस्य ह्यनन्यशेषत्वेन स्वतन्त्रतया विधीयमानस्य युक्तं यदर्थवादो

१— मी० सू० ३. ८. १५। २— 'अकरणमन्त्रो यत्र, तत्र'-इति ङ।

३— मी० सू० ३. ८. २५। ४— 'विकल्पः (भिन्नः?)-इति ञ, झ, ञ, ट।

५— 'ननूपस्पर्शनस्यापामेवेदं'-इति ञ, झ, ञ, ट।

६— "द्वादशरात्रादीनि रात्रिसत्राणि"-इति का० श्रौ० सू० २४. १. १।

७— नास्त्येतद् वाक्यं ङातिरिक्तेषु पुस्तकेषु।

ऽप्यपेक्षितं फलं समर्पयतीति ; उपसर्जनस्य तु संस्कारतया संस्कार्यैणैव प्रयोजनेन निरपेक्षितस्य कथ मपेक्षितं फलं समर्थो ऽर्थवादः[१] समर्पयितुम्[२] ? यथा— "यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति[३] । अत्र ह्यञ्जनस्य संस्कारतया फल मनपेक्षमाणस्य भ्रातृव्यचक्षुर्वर्जनं न फल मिति । सूचितं च— "द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुति-रर्थवादः स्यात्"-इति[४] ।

ननु साध्यसाधनेतिकर्त्तव्यतालक्षणे अंशत्रये ऽनुप्रविष्टं कञ्चिदप्यर्थ मनभिदधानस्य वाक्यस्यानर्थक्य मेव प्राप्तम् ; "आम्नायस्य क्रियार्थ-त्वादानर्थक्य मतदर्थानाम्"-इति[५] । तत्रैव कस्यचिदंशस्य स्तुत्यापि भवत्यर्थवत्तेति चेत्, न; प्रवृत्तिविशेष मकुर्वाणया किं स्तुत्या? [illegible] यथा [illegible] स्तुतस्य तावानेव सोऽर्थः[६] । अत्रोच्यते । इह लिङादियुक्तेषु वाक्येषु द्वे भावने । शब्दात्मिका चार्थात्मिका च। उक्तं च— "अभिधां भावना माहुरन्या मेव लिङादयः ।

अर्थात्म-भावना त्वन्या सर्वाख्यातेषु गम्यते"-इति ।

एकैका च सा साध्यसाधनेतिकर्त्तव्यताभिः त्रिभिरंशैरंशत्रय-वती । भावनायां[७] हि स्वर्ग एकः साध्योऽंशः, तत्करण माग्नेयादिः साधनम्, प्रयाजादिरितिकर्त्तव्यतारूपः । तत्रैवार्थभावनायां पुरुष-प्रवृत्तिः शब्दभावनाया भाव्यम्, लिङादिः तद्व्यापारो वा करणम्,

१— 'फल मसमर्थोऽर्थवादः'—इति ज, झ, ञ, ट ।
२— 'समर्थयितुं'—इति ज, झ, ञ, ट । ३— तै० सं० ६. १. १. १७।
४— मी० सू० ४. ३. १ । ५— मी० सू० १. २. १ ।
६— 'तावानेवास्यार्थः'—इति ड । ७— 'अर्थभावनायां'—इति ठ, ड ।

आर्थवादिकी स्तुतिरितिकर्त्तव्यता[१]। तत्रार्थभावनाया अंशत्रयात्-

१— भावनोपदेशोऽयं मीमांसापरिभाषायां विशेषतो व्यक्तः, अर्थसङ्ग्रहे लौगाक्षिभास्करेणाप्यल्पाक्षरेण सम्यग् बोधितः। तथाहि—"स च यागादि-र्यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्ग मुद्दिश्य पुरुषं प्रति विधीयते। तथाहि यजेतेत्यत्रांशद्वयम्— यजिधातुः प्रत्ययश्च। प्रत्ययेऽप्यस्त्यंशद्वयम्— आख्यातत्वं लिङ्त्वञ्च। तत्राख्यातत्वं दशलकारसाधारणं, लिङ्त्वं पुनर्लिङ्मात्रे। उभाभ्या मप्यंशाभ्यां भावनैवोच्यते। भावना नाम भवितुर्भवनानुकूलो व्यापार-विशेषः। सा द्विधा— शाब्दी भावना, आर्थी भावना चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दीभावना। सा च लिङंशेनोच्यते; लिङ्श्रवणे ध्ययं मां प्रवर्त्तयति, मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः। यद्यस्माच्छब्दान्नियमतः प्रतीयते, तत्तस्य वाच्यम्; गा मानयेत्यस्मिन् वाक्ये यथा गोशब्दस्य गोत्वम्। स च व्याप[illegible]लौकि[illegible] चे पुरुषनिष्ठोऽभिप्रायविशेषः; वैदिकवाक्येषु पुरुषाभावात् लिङादिशब्दनिष्ठ एव। अत एव शाब्दी भावनेति व्यवह्रियते। सा च भावना अंशत्रय मपेक्षते— साध्यं साधन मितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेत्? इति। तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति; एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः। सङ्ख्यादीना मेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न साध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति; तस्य च करणत्वं न भावनोत्पादकत्वेन, तत्पूर्व मपि तस्याः शब्दे सत्त्वात्; किन्तु भावनाज्ञापकत्वेन, शब्दभावना-भाव्यनिर्वर्त्तकत्वेन वा। इतिकर्त्तव्यताकाङ्क्षाया मर्थवादज्ञाप्यप्राशस्त्य मितिकर्त्तव्यत्वेनान्वेति। प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी भावना। सा चाख्यातसामान्यस्य; व्यापारवाचित्वात्। साप्यंशत्रय मपेक्षते— साध्यं साधन मितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेदिति। तत्र साध्याकाङ्क्षायां स्वर्गादि फलं साध्यत्वेनान्वेति, साधनाकाङ्क्षायां यागादि करणत्वेनान्वेति, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजाल मितिकर्त्तव्यत्वेनान्वेति"—इति॥

भिधानेऽपि शब्दभावनेतिकर्त्तव्यताभूतां स्तुतिं ब्रुवाणो ऽर्थवादः कथ मनर्थकः स्यात् । यदाह सूत्रकारः— "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः"–इति[१] । स्तुतिविरहे त्वंशवैकल्यादपरिपूर्ण-शब्दभावनया न प्रवृत्तिरर्थभावनायां पुरुषस्येति तस्या अप्यानर्थक्येन मूलोच्छेदप्रसङ्ग इति कथ मनर्थिका स्तुतिः स्यात् । यत्त्वर्थवादरहितं[२] केवलं विधिवाक्यम्, तत्र विधिरेव स्तुति माक्षिपतीति नोक्तदोषा-वतारः; इह प्रत्यक्षश्रुतायां स्तुतौ सत्यां किं माक्षेपक्लेशेनेत्यलम् । अयं[३] च विचारः उत्तरत्र सर्वेष्वेवार्थवादेषु द्रष्टव्य इति ।

अनृतवदननिमित्ताशुद्धिपरिहारेणोपस्पर्शनस्य प्राशस्त्य मभिधाय तत्साधनभूताना मपां स्वतः शुद्धत्वात् स्वसम्बन्धिशुद्धिहेतुत्वाच्च तत्कृतित मित्याह— "मेध्या वा इति ॥ १ ॥

इदानी मग्निदर्शनलक्षणेनाङ्गान्तरेण सहितं समन्त्रकं व्रतोपायनं विधत्ते— "सोऽग्नि मिति । 'सः' यजमानः 'अग्निम्' आहवनीयम् । मन्त्रार्थस्तु— हे व्रतस्य पालक ! अग्ने ! अनृतवदनत्यागादिरूपं 'व्रतं' चरिष्यामि ; तत्कर्त्तुं शक्तो भूयासम् । शक्नोतेर्लिङ्याशिष्यसम् । मदीयं 'तद्' व्रतं 'राध्यताम्' समृद्धं भवत्विति[४] ।

व्रतपतिपदं व्याकरोति— "अग्निर्वै देवाना मिति । उभय-वाक्यस्याव्याख्येयत्व मत्र— शकेयं राध्यता मिति । तत्र च हेतु माह— "नाचेति । 'तिरोहितम्' अविस्पष्टार्थं पदम्[५] ॥ २ ॥

१— मी० सू० १. २. ७ । २— 'यदर्थवादरहितं'–इति ज,झ,ञ,ट ।
३— 'एष'–इति ठ । ४— वा० सं० १. ५. १। तै० सं० १. ५. १०. ८ ।
५— यतोऽत्र अविस्पष्टार्थं पदं नास्ति, अतो व्याख्याने प्रयोजनाभाव इत्यर्थः ।

स्वीकृतस्य व्रतस्य यागसमाप्तिपर्यन्तता माह— "अथेति। 'संस्थिते' यागे पर्यवसिते। विसर्जनमन्त्र माह— "अग्ने व्रतपते व्रत मचारिष मिति[1]। अशकम राधीति पूर्वमन्त्रादेव लक्षणम्। तत्र हेतु माह— "अशकद्धीति। यो यज्ञस्य पर्यवसानं प्राप्तवान्, 'एतत्' कर्म कर्त्तुम् 'अशकत्' शक्तोऽभूत्। तस्मै तेन कर्मणा 'अराधि' सिद्धम्; तत्कर्म असिध्यदित्यर्थः। अगन्मेति गमेर्लुटि "मन्त्रे घसेति[2] च्लेर्लुकि, हल्ङ्यादिलोपे[3], "मो नो धातोरिति[4]। अथ व्रतोपायने मन्त्रान्तरं विधातुं पूर्वमन्त्रात्तस्यैव विशेष माह— "एतेनेति। यत्र 'एतेन' वक्ष्यमाणेनेद मह मित्यादिना[5] बहवो व्रत मुपयन्ति, अतस्तु हेतोः अनेनैवोपेयात्। एवकारेणैष मन्त्रः प्रशस्यते, न तु पूर्वो निषिध्यते। अत एव कात्यायनोऽप्यस्य मप्याह— "अग्ने व्रतपंत इद मह मिति वा"-इति[6]॥ २॥

इद मह मिति मन्त्रे कर्मत्वेनापादानत्वेन च सत्यानृतयोरुभयो-रेवोपादाने कारण माह— "द्वयं वा इति। यद् 'इदं' जगत्, तत् सर्व मनृतं सत्यं वेति कोटिद्वय मेव; न तृतीया कोटिरस्ति। सत्य मेव देवाः; चिरावस्थानात्, नियमेन सत्यवादित्वाद्वा। अनृतं मनुष्याः; स्वप्नदृष्टवदल्पकालावस्थानात्, प्रायेणानृतवादित्वाद्वा। तथा च देवमनुष्याणां सत्यानृतवादित्व मैतरेयके[7] ऽप्याम्नातम्—

१— वा० सं० २. २८। तै० सं० १. ६. ६. १३।

२— पा० सू० २. ४. ८०। ३— पा० सू० ६. १. ६८।

४— पा० सू० ८. २. ६४। ५— वा० सं० १. ५. २।

६— श्रौ० सू० २. १. ११। ७— 'तैत्तिरीयके'-इति ञ, झ, ञ, ट, ढ।

"सत्यसंहिता वै देवा अनृतसंहिता मनुष्याः"-इति[१]। सत्यानृत-वदनसाहित्यं हि तत्र विवक्षितोऽर्थः; "तस्माद्दीक्षितेन सत्य मेव वदितव्यम्"-इति वाक्यशेषात्[२]। यदनेन मन्त्रेणोच्यते 'तन्मनुष्येभ्यो देवानुपैति'-इत्येवमात्मक मिम मर्थ मयं मन्त्र आहेत्यर्थः ॥ ४ ॥

अनेन मन्त्रेण व्रत मुपेयुषो नियम माह— "स वा इति। 'सः' इत्ययं कृतव्रतोपायनः 'सत्य मेव' इत्येवकारकरणादनृतं न वदे-दित्यर्थः। असत्येवकारे यद्यत् सत्यं, तत्तदवश्यं वक्तव्यं स्यात्,— "यद्वं सम्भाष्टौ तिवदेकत्वस्याविवक्षितत्वात्; अनृतवचनं चाप्रतिषिद्धं स्यात्, इष्यते च तन्निषेधः। अत एव तैत्तिरीयके दर्शपूर्णमासप्रकरणे समाम्नायते— "तस्यैतद् व्रतं नानृतं वदेत्"-इति[३]। यद्यप्या-हिताग्निमात्रस्यानृतवदन मन्यत्र प्रतिषिध्यते[४]— "तस्मादाहिताग्नि-र्नानृतं वदेत्"-इति[५], तथाप्यनृतवदनवर्जनस्य दर्शपूर्णमासाङ्गत्वसिद्धये पुनरिह वक्तव्य मेव; इतरथा ह्यनृतवदनेऽपि पुरुष एव प्रत्यवेयात्, क्रतुः पुनरविगुण एव स्यात्;—

"को नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत्।

न क्रतोस्तत्र वैगुण्यं यथाचोदितसिद्धितः"-इतिन्यायात्।

नन्वनेनापि वचनेन कथ मनृतवदननिषेधस्य कर्माङ्गत्वसिद्धिः? वदेदितिप्रत्ययार्थस्य कर्तुः प्राधान्यात् तदर्थ एवायं प्रतिषेध इति हि युक्तम्। कर्मप्रकरणात् कर्माङ्गतेति चेत्, न; प्रतिषेध्यपाठादपि

१— ब्रा० १. १. ६। २— तत्रैव ततः प्राग् द्रष्टव्यम्।
३— सं० २. ५. ५. ११। ४— 'निषिध्यते'-इति ज, झ, ञ, ट।
५— "न वाहिताग्निनानृतं वदितव्यम्"-इतीहैवोपरिष्टात् (२. २. २. २०.)।

क्रियायाश्चावत्कर्त्तृविशेषता पदश्रुत्या प्रतीयते, तदर्थं प्रतिषेध्यम्; तादर्थ्येनैव प्रतिषेधोऽपि चाभिधीयते इति श्रौतेन पुरुषार्थत्वेन प्रवृत्तेन प्राकरणिकी दर्शपूर्णमासार्थता बाध्यते ।

ननु न वदेदिति पदद्वयगम्यप्रतिषेधस्य कर्त्तुः सम्बन्धः, पदद्वयवाक्य मिति कथं प्रतिषेधस्य कर्त्तुः सम्बन्धः श्रौतः? इति चेत्, न; यथा "ग्रहं सम्मार्ष्टीति पदद्वयगम्यसम्मार्गस्य ग्रहविशेषता, तथापि द्वितीयायाः क्रियासामान्यं प्रति ग्रहस्य शेषत्वाभिधानात् तद्विशेषस्य सम्मार्गस्य पदान्तरेणोपस्थानेऽपि शेषशेषिभावस्य श्रौतता[1], तद्वत् । अत इह पुरुषार्थो निषेधो विधीयते । स्मृत्यैव विहित इति चेत्, तथापि हि तस्या एषैव श्रुतिर्मूलं भविष्यति; द्वयोरर्थसाम्यात् । अतो युक्तः श्रुत्या प्रकरणबाध इति । अथ मन्ये—'अविरोधे न दुर्बलं प्रबलेन निराक्रियते; न तु स्वयम्प्रबले मित्येव दुर्बलस्य हिंसा न्याय्या । न चेह प्रकृतक्रियया कर्त्तुः सम्बन्धे प्रकरणबाधः; अतो न केवलक्रत्वर्थतेति ।

ननु पुरुषमात्रार्थोऽनृतनिषेधः स्मृत्यैव सिद्धः, स एव क्रतुगतपुरुषार्थोऽपि भविष्यतीति किमनेन विशेषनिषेधेन?। न च तस्याः स्मृतेरियं श्रुतिर्मूल मिति युक्तम्; सामान्यविशेषतया मूलमूलिभावासम्भवात् । एवं तर्हि सर्वविशेषगामिना सामान्येन स्मृतिसिद्धस्य निषेधस्य प्रकरणाबाधायाच[2] क्रतुगतपुरुषविशेषे अनुवादोऽस्तु, तस्य प्रत्ययार्थत्वेन प्राधान्यादित्युक्तम् । स्यादेवं यदि कर्त्तुः

१— 'ऽपि न शेषशेषिभावस्य श्रौतत्वभङ्गः'—इति ज, झ, ञ, ट, ठ ।

२— एतदनन्तरं 'अत'—इति पद मधिकं ज-झ-ञ-ट-पुस्तकेषु ।

प्रत्ययार्थत्वं स्यात्, न त्वेतदस्ति; अनन्यलभ्यस्यैव शब्दार्थत्वात्। अवश्याभिधातव्यया भावनयैवाक्षेपात् कर्त्तुः प्रतीतेः। न च "लः कर्मणि च"-इति[1]स्मृतिबलात् कर्त्तुः प्रत्ययार्थता; तस्याः स्मृतेर्द्व्येकयो[2]रित्यनेनैकवाक्यत्वे प्रत्ययाभिधेयत्वेनोच्यमानयोर्द्वित्वैकत्वयोर्व्यावर्त्तकत्वेनैव कर्त्तुः समर्पणात्,— कर्त्तृद्वित्वे द्विवचनं कर्त्रेकत्वे एकवचन मिति; अतो भावनया संख्यया वा आक्षेपादेव कर्त्तुः प्रतीतिः सिद्धेति न स प्रधानतया प्रत्ययार्थः; अतः क्रियाया एव प्राधान्यात् तस्या एवाङ्गत्वेनानृतनिषेधो विधीयते। न च स्मृत्या पुरुषार्थतया विहितस्यानृतवदननिषेधस्य[3] कथ मिह प्रकरणात् क्रत्वर्थतेति[4] वाच्यम्; "खादिरो यूपो भवति[5]"-"खादिरं वीर्यकामस्य[6]"-इतिवत् संयोगपृथक्त्वेनोभयार्थत्वसिद्धेः। उक्तं हि—"एकस्य तूभयत्वे संयोगपृथक्त्वम्"-इति[7]। अतः सत्य मेव वदेदिति दर्शपूर्णमासाङ्गत्वेनानृतप्रतिषेधस्य विधिरय मिति सिद्धम्। तदाह कात्यायनः— "इद मह मिति[8] वा सत्यवाद्यतः, कर्माङ्ग मुत्तरे सत्यवदनम्"-इति[9]।

तस्मात्ते यश इति। यशस्विनां देवानां यशोऽपि यशःप्रतिपादनाय प्रशस्तम्। 'एवम्' "अग्ने व्रतपते"-इतिमन्त्रवत्। इद मह मिति क्रियाविशेषणत्वान्नपुंसकम्॥ ५॥

१— पा० सू० ३. ४. ६९। २— पा० सू० १. ४. २२।

३— 'विहितस्यातोऽन्तवदननिषेधस्य'-इति ज, झ, ञ, ट।

४— 'कर्मार्थतेति'-इति आदिषु। ५— इहैवोपरिष्टात् (३.६.२.१२.)।

६— ऐ० ब्रा० २. १. १। 'खादिरं स्वर्गकामो वीर्यकामो वा'-इति आप० श्रौ० सू० ७. १. १६। ७— मी० सू० ४. ३. ५।

८— वा० सं० १. ५. २। ९— श्रौ० सू० २. १. ११,१२।

मन्त्रेणाभ्युपेतस्य व्रतस्य प्रसङ्गाद्विसर्जन माह— "अथ०सᳪस्थित इति। अयत्यविसर्जनमन्त्रस्य[1] अय मर्थः,— व्रतोपायनात् प्रागहं य एव मनुष्योऽस्मि, व्रतं मुक्त्वा स एव मनुष्यः इद मस्मि; न तु व्रत-समये इव[2] देवः। इद मिति क्रियाविशेषणत्वान्नपुंसकम्[3]।

नन्वसौ मनुष्यो व्रतसमयेऽपि मनुष्य एव, तत् किं मुच्यते य एव मनुष्योऽस्मि स एवेद मस्मीति? तत्राह— "अमानुष ऽइवेति। मनुष्योऽपि हि तदा अन्यात्मकत्वात्[4] सत्यवदनाद्वा देव इवेत्युक्तम्, व्रतत्यागे तु कृते व्रतारम्भात् प्रागिव स्वभावसिद्धं मनुष्यत्व मेवेति।

ननु यथा व्रतोपायने अनृतात् सत्य मुपैमीत्युक्तम्, एवं तत्त्यागे सत्यादनृत मुपैमीति किं नोक्त मित्यत आह— "न वीति।

महत उत्कर्षात्[5] (देवत्वात्[6]) प्रच्युतत्वेनात्यन्तनिकृष्टमानुषत्व-प्राप्तिकथनस्य परुषत्वादनवकल्पनं तदाह— "तद् खल्विति ॥ ६ ॥

व्रतप्रसङ्गादागतं तद्विसर्जनं समाप्य पूर्वेद्युर्यजमानेन व्रतानन्तरं यत् कर्त्तव्यं तत् प्रतिजानीते— "अथात इति। यतो व्रतानन्तर मशनानशनापरनामक मारण्याश्यशन मेव यजमानेन कर्त्तव्यम्, 'अतः' तदनन्तर मेव तस्य निरूपणं क्रियत इत्यर्थः।

१— "व्रतं विसृजते येनोपायात्"—इति का०श्रौ०सू० ३. ८. २९। 'पूर्वं हि व्रतग्रहणे द्वौ मन्त्रावुक्तौ अग्ने व्रतपते इदमह मिति वेति (का० श्रौ० सू० २. १. ११.), अत्र इद मह मित्येव मन्त्रः श्रुत्यभिमतः"—इति हरिस्वामिनः। श्रुतिश्च सा इहैवाग्रे द्रष्टव्या—१. ९. ३. २३।

२— मन्त्रपाठः खलु वा०सं० २. २८. २ द्रष्टव्यः।

३— नपुंसकत्वम्'—इति भ, ठ, ढ।

४— 'आत्मात्मकत्वात्'—इति भ, 'सात्मकत्वात्'—इति ख।

५— 'उत्कृष्टात्'—इति ढ।

६— नास्त्येतत् पदं ढ-पुस्तके।

•प्रतिज्ञातस्याशनानशनपक्षस्य प्रशंसार्थं केवलानशनपक्षं निरसितु मुपन्यस्यति— "तदु हेति। 'तत्' तस्मिन्नशनानशनविषये सवयसः पुत्रः ('सावयसः') 'अषाढ'-नामकः, सर्वात्मना अशनत्याग मेव व्रतं मेने। तथा मन्यमानस्याषाढस्याशय माह— "मनो हेत्यादि। अनुप-न्यस्त मपि मनुष्यस्य मनः 'आ' समन्तात् जानन्ति। अतो योऽसौ यजमानो व्रत मुपैति, एष नः प्रातरवश्यं यक्ष्यत इति ज्ञात्वा 'विश्वे' सर्वे 'ते' देवाः व्रतदिवसे यजमानस्य गृहानागच्छन्ति।

'उपवसथ'-नामनिर्वचनेन देवाना मागमनं दृढ़यति— "तेऽस्येति। 'उप' समीपे यजमानस्य वसन्ति देवा अस्मिन्निति पर्वदिवस 'उप-वसथ'-नामक इत्यर्थः ॥ ७ ॥

अस्तु किं ततः? इति चेत्— "मनुष्येष्विति। गृहे मनुष्येष्वा-गतेषु अनश्नत्सु 'यः' कश्चिद्यजमानः स्वयं पूर्वं भुञ्जीतेति यत्तदेवा-नुचित मिति वितर्कयामः; अथ यः कश्चिद् देवेष्वनश्नत्सु पूर्वो ऽश्नीयादिति यत्, तस्यानवक्लृप्तिः किमु वक्तव्या? कैमुतिकन्यायफल माह— "तस्मादिति। 'उ'-इत्यसन्देहे। तस्मादेव हेतोः अशन-वर्जनलक्षणेऽर्थे नास्ति सन्देह इत्यर्थः ॥ ८ ॥

अषाढेन चेन्मुनिना निर्णीतो ऽनशनपक्षः, तर्हि स एव परमार्थः; कथ मशनानशनपक्षः? इति चेत्, अस्यापि मुनिनैव याज्ञवल्क्येन सोपपत्तितो निर्णीतत्वादित्याह— "तदु हेति। 'तदु' तस्मिन्नप्यशना-नानशनपक्षे याज्ञवल्क्य उपपत्तिम् 'उवाच' आह।

अशनानशनलक्षणस्वमतसमर्थनाय प्रत्येकपक्षौ दूषयति— "यदी-ति। दैविके हि कर्मणि देवान् प्रत्युद्दिष्टस्यैव हविषः प्रथम मनुप-

योगः, काम मन्यस्य; पित्र्ये पुनरतिनियमाद्धविषोऽन्यदप्यि अनुपयोज्य मिति पितृदेवत्यता मापादयतीति याज्ञवल्क्यस्याशयः। तत् किं दैविके कर्मणि प्रागपि भोक्तव्य मिति यः, त माशय मजानानः शङ्कते; तं प्रत्याह—"यद्यु इति। 'यद्यु' यदि त्वश्नाति, तदा अग्निग्निषतो देवानतिक्रम्य स्वयं भुक्तवान् स्यात्।

अशनानशनपक्षयोरुभयोरपि दोषश्चेत्, का गतिः? इति (तत्राह—"स यदिति[1]।) 'यद्' द्रव्य मशित मप्यनशितवद् भवति, तदश्नीयात्। किं तदिति तदाह—"यस्येति। 'यस्य' द्रव्यस्य सम्बन्ध्यन्नं 'हविः' देवा न गृह्णन्ति, तदशित मपि सद् अनशितवद् भवति।

तथात्वे यथोदीरितदोषद्वयाभाव माह—"स यदिति। अशनादेव न पितृदेवतात्वम्; अश्नमानस्य देवायोग्यत्वादेव न देवानां मतिक्रमः[2] ॥ ९ ॥

अथ किं न्वेवं प्राश्यद्रव्यम्[3]? इति तदाह—"स वा इति। आरण्यग्रहणं प्रकृतदर्शपूर्णमासहविर्व्यतिरिक्तोपलक्षणम्। 'वृक्ष्यं' वृक्षोद्भवं फलम्।

१— नास्त्येषोऽंशः ठ-पुस्तकादन्यत्र।

२— 'अशनान्न पितृदेवतात्वम्, तस्यान्नस्यादेवयोग्यत्वादेव न देवाना मतिक्रमः'-इति ड। 'अशनानशनपितृदेवतात्वम्, अस्य यजमानस्य देवयोग्यत्वादेवं न देवाना मतिक्रमः'-इति ज, झ, ञ, ट।

३— 'अथ किं त्वाश्यद्रव्यम्?'-इति ज, झ, ञ, ट; 'अथ किं तादृग् द्रव्यम्?'-इति ठ।

भुक्तोपेलक्षणत्वे मुनिविशेषव्यवहारं प्रमाणयति— "तदु हेति । वृषा नाम कश्चित्, तस्य पुत्रो 'वार्ष्णः', तस्य नाम 'वर्कुः'-इति ।

मुनेर्मत मपवदति— "तदु तथेति । तत्र हेतुः— "व्रीहियवयोरिति । 'शमीधान्यं' तिलमाषादि । उपचिनोतीति 'उपचम्' अल्पेनापि माषपिष्टेन मिश्रितं व्रीहिपिष्टम् । त्रिचतुरान् यामानपि स्थापितम्[1] 'उपचितं' बहु भवति इति प्रसिद्धं तदाह— "व्रीहियवाविति । अतो माषोपयोगे व्रीहियवावेव यत उपयुक्तौ स्याताम्, अतस्तथा न कुर्यात् । अतो युक्त मारण्य मेवाश्नीयादिति । तदेवं व्यवस्थितं सकृदशनम् ॥ १० ॥

स आहवनीयेति । तां रात्रि माहवनीयागारे गार्हपत्यागारे वा शयीत[2] । तत्रैव शयने हेतुः— "देवान् वा इति । 'उपावर्त्तते' समीपे शेते[3] । 'अधः शयीत' न पुनः खट्वाद्युपरि; यत उपरि स्थितं श्रेयांस मध एव स्थिताः[4] उपचरन्ति ॥ ११ ॥

अथ प्रभाते अध्वर्योः कर्त्तव्यता माह— "स वा इति । 'सः' प्रसिद्धोऽध्वर्युः प्रथमेन कर्मणा अप एवाभिमुख्येन प्राप्नोति । किं तत्प्रथमं कर्म ? तदाह— "अपः प्रणयतीति । एतच्चापां प्रणयनम्; "अथ संयौति"-इति[5] वक्ष्यमाणसंयवनार्थम् । अतः संयवनात्

१— 'माषानपि प्रापितम्'—इति ज, झ, ञ, ट ; 'माखावपितं'—इति ढ ।

२— का० श्रौ० सू० २. १. १४, १५ । ३— 'सेवते'—इति ठ ।

४— 'खट्वाद्युपरि ; यत उपस्थितं श्रेयांस मध उपस्थिताः'—इति ज, झ, ञ, ट । 'खट्वाद्युपरि शयीत ; उपस्थितं श्रेयांस मध उपस्थिताः'—इति ठ ।

५— १प्र० ६ब्रा० ३क० अथवा २अ० २ब्रा० ३क० ।

प्राक् प्रणीतानां नाशे पुनः प्रणयनं कार्यम्; कृते तु संयवने तन्नाशे ऽपि प्रयोजनस्य[1] जातत्वान्न पुनः प्रणेतव्यम्।

ननु अन्तर्वेदि प्रणीता निनयति[2] इत्युपरितन-निनयनार्थं पुनः कस्मान्न प्रणयन मिति चेत्, न; संयवनप्रसक्तौ तासा मेवापां प्रतिपत्तिमात्रम्, अतो न तद्पां प्रणयनस्य प्रयोजकम्; न हि चात्वाले प्राशनं कृष्णविषाणां[3] प्रयुङ्क्ते।

अथोभयं साधयतः[4] प्रणयनस्य कथं संयवन मेव प्रयोजनम्, न तु अन्तर्वेदि निनयन मिति चेत्, (न[5]), "पूर्णपात्रं निनयति"-इति[6] द्वितीयया अपां संस्कारकर्मत्वप्रतीतेर्निनयनस्योपयुक्तसंस्कार-तया प्राशनवत् प्रतिपत्तित्वात्। संयवने तु समानप्रकरणे शाखा-न्तरे "प्रणीताभिः[7] (हवींषि) संयौति"-इति[8] तृतीयया अपां संयवनं प्रति गुणत्वप्रतीतेः। अतः संयवनार्थ मेव प्रणयनम्।

उक्तं प्रणयनं प्रशंसति— "यज्ञो वा इति। अपां यज्ञसाधनतया यज्ञरूपत्वात्तद्विस्तारात्मकस्य प्रणयनस्य यज्ञविस्ताररूपत्वात् प्राश-स्त्यम् ॥ १२ ॥

उक्तं प्रणयन मनूद्य कस्त्वेति व्याहृतिचतुष्टयात्मकं मन्त्रं[9] विधत्ते— "स प्रणयतीति। हे प्रणीतोदक! को नाम त्वां यज्ञेन 'युनक्ति'

१— 'संयोजनस्य'-इति ड। २— इहैव २.२.२। का०श्रौ०२.५.११,१२।
३— इह ३.२.१.१८,२८; का०श्रौ० ७.३.२६; तै०सं० ६.१.२.१५।
४— 'अथोभयसाधनता'-इति ड। ५— नैतत् पदं ठ-पुस्तकादन्यत्र।
६— इहैव ६.३.१। ७— 'प्रणीतेन'-इति ज, झ, ञ, ट, ड।
८— आप०श्रौ०सू० १.२४.३। ९— वा० सं० १.६.१-४।

योक्तुं समर्थः? यः समथः 'सः' युनक्ति। 'कस्मै' त्वा प्रयोजनाय युनक्ति? यस्मै युनक्ति, तस्मै युनक्ति। योजने कर्त्ता प्रयोजनस्य दुर्ज्ञान मित्यर्थः। व्याह्रियन्त इति 'व्याहृतयः' मन्त्राः; दुर्ज्ञानत्वाभिधानात्, अनिश्चित्य वचनाच्च[1] 'अनिरुक्ताः'। व्याहृतिविशेषणस्यानिरुक्तत्वस्य प्रयोजन माह— "अनिरुक्तो वा इति। अनिर्ज्ञातो हि पदार्थः क इत्युपयुज्यते[2]। अतोऽसावनिरुक्तः प्रजापतिश्च 'कः'-इत्युच्यते। "को ह वै नाम प्रजापति" इति श्रुतिः[3]। अतः श्रुतिसाम्यात् प्रजापतेरनिरुक्तत्वम्। अथवा वाचकमन्त्रोच्चारणमन्तरेण मनसैव (ध्यात्वा[4]) प्रजापतेर्होमादपि प्रजापतिरनिरुक्तः[5]। "यत्तूष्णीं तत्प्राजापत्यं स मनसा जुहोति, मन इव हि प्रजापतिः"-इति[6] श्रुतेः। अस्त्वनिरुक्तः[7] प्रजापतिः, प्रस्तुते किं मायात मित्यत आह— "प्रजापतिर्यज्ञ इति। "प्रजापतिर्यज्ञ मसृजत"-इति[8] यज्ञस्रष्टृत्वश्रुतेः कार्यस्य कारणादभेदात्। तथा "एष वै सप्तदशः प्रजापतिर्यज्ञ मन्वायत्तः"-इति[9] सप्तदशसमुदायात्मकस्य प्रजापतेः

१— 'निश्चित्य अवचनाच्च'—इति ठ। २— 'इति पर्यनुपयुज्यते'—इति ठ।

३— तै० ब्रा० २. २. १०। ४— नास्त्येतत् पदं ठ-पुस्तकादन्यत्र।

५— "अनिरुक्तं वा उपांशु"—इति, "अनिरुक्तं हि मनो ऽनिरुक्तं ह्येतद् यत् तूष्णीम्"—इति चेहैव (१.३. ५. १०, २. ४. ४. ५.)।

६— तै० सं० ६. ६. १०. ३। "मनोऽसि प्राजापत्यम्"—इति तत्रैव १. ६. २. १२, "मनो वै प्राजापत्यम्"—इति च १. ६. १०. ४।

'श्रुतेः स त्वनिरुक्तः'—इति ज, झ, ञ, ट।

तै० ब्रा० १. ७. १. ४। ऐ० ब्रा० ७. ४. १। "प्राजापत्यो यज्ञः"—इति तै० सं० १. ६. १०। ९— तै० सं० १. ६. ११. १।

सकलयज्ञानुगमश्रुतेः। अनुगच्छतश्च सामान्यादेर्लोके न पृथक् अनुगन्तव्यः; व्यक्तावभिमानदर्शनात्। यस्मात् प्रजापतिर्यज्ञः[1], अतः अनिरुक्ताभिर्व्याहृतिभिः प्रणयनादनिरुक्तप्रजापत्यात्मकतया अनिरुक्तं यज्ञ मेव 'युनक्ति' प्रारभत इत्यर्थः ॥ १३ ॥

प्रशब्दोपात्तप्रकर्षसूचितप्राथम्यद्वारा प्रणयनं प्रागस्तावीत्— "यज्ञो वा इति। तच्च नयतिपदोपात्तप्रापणात्मकविस्तारद्वारत इति 'अथापः'-इत्यस्यावयवार्थपर्यालोचनयापि द्विधा[2] स्तौति— "यद्वेति। अनियोग एवकारः। न नियोगेन प्रागुक्तरीत्या स्तुतिः, किन्त्वेव मप्यस्तीत्यर्थः। आप्नुवन्ति[3] सकलं जगदित्यापः। तादृशा मपां प्रणयनात् प्रथम मेव सर्व माप्तं स्यादित्यपि प्रशस्तं[4] तत्प्रणयन मित्यर्थः ॥ १४ ॥

अथवास्य कर्मणो यदेवाङ्गं प्रापयितव्य मध्वर्य्वादयः प्रमादान्न प्रापयन्ति, तद्वैकल्यम् उदकाचमनप्रोक्षणादिना[5] परिहरन्त आपयन्ति; अतोऽप्याप इति तत्प्रणयनं प्रशस्तम् ॥ १५ ॥

न केवल मवयवार्थपर्यालोचनया, उदकप्रभावपर्यालोचनयापि प्राशस्त्यं वक्तु मारभते— "देवान् हेति। असुराश्च रक्षांसि च 'असुररक्षसानि'। "अनसन्तान्नपुंसकाच्छन्दसि"-इत्यसन्तत्वात् समा-

१— 'सामान्यादेर्लोकेऽप्यानुगन्तव्यः। व्यक्ताद्यभिमानदर्शनात् प्रजापति-र्यज्ञः'-इति ज, झ, ञ, ट।

२— नास्त्येतत्पदम् ड-पुस्तके। ठ-पुस्तके तु 'द्वेधा'-इति।

३— 'व्याप्नुवन्ति'-इति ड, ढ। ४— 'प्रशस्तम्'-इति ज, झ, ञ, ठ।

५— 'उदकप्रोक्षणाचमनादिना'-इति ठ।

मान्तः[1]।०'न यच्छध्व इति' यष्टुं न लभध्वं यूय मिति वदन्तो 'ररचुः' प्रतिबन्धयेयुरित्यर्थः[2] ॥ १६ ॥

ततो देवा इति। इत्थं प्रतिबद्धा देवाः 'एतम्' अब्लक्षणं वज्रं ददृशुः। अपां वज्रत्वं "ता एता आपो वज्रीभूत्वा"-इत्यादि श्रुत्यन्तरे प्रसिद्धम्[3]; तदाह— "वज्रो वा इति।

न केवलं प्रसिद्धिबलादवज्रत्वम् उपपत्तिबलाच्चेत्याह— "वज्रो हीति। उपपत्तेः प्रसिद्धिं वै-शब्द आह। तां प्रसिद्धा मुपपत्तिं दर्शयति— "तस्मादिति। यस्मादापो वज्रः, तस्माद् एता आपः 'येन' पथा गच्छन्ति, तं पन्थानं 'निम्नं' गर्त्तं कुर्वन्ति। गत्वा वा 'यत्र' तृणगुल्मादौ उपतिष्ठन्ते, तत् 'निर्दहन्ति' निःसारं कुर्वन्ति। (ते[4]) देवाः 'एतम्' उदकलक्षणं वज्रम् 'उदयच्छन्' उक्तप्रकारप्रणयनात्मक मुद्यमनं तस्य कृतवन्त इत्यर्थः। 'तस्य' वज्रस्य सम्बन्धिनि 'अभये' तेन वज्रेण परिहृतभये[5], 'अनाष्ट्रे' नाशयन्तीति नाष्ट्राण्यसुररक्षांसि, तद्रहिते, 'निवाते' तत्संस्पृष्टेन[6] वातेनापि रहिते, स्थाने। यथा देवाः कृतवन्तः, तथैवैषा मध्वर्युः ॥ १७ ॥

प्रणयनप्रकार माह— "ता उत्सिच्येति। चमसादिपात्रस्योपरि

१— पा० सू० ५.४.१०३। २— 'प्रतिबबन्धुरित्यर्थः'—इति ठ।

३— तै० ब्रा० १.७.१.६.७; ऋ० सं० ८.१४.१३ (अपाम्फेनेन)

४— नास्त्येतत् पदं ठ-पुस्तकादन्यत्र।

५— 'सम्बन्धिनाभयेन वज्रेण'—इति ज, झ, ञ, ट। 'सम्बन्धिनि "अभये" वज्रेण परिहृतभये'—इति ड।

६— 'तत्संस्पृष्टेन'—इति ठ।

सिक्त्वा पूरयित्वा न पुनः (तेन पात्रेण[1]) कुतश्चिज्जलाशयादुद्धृत्य गार्हपत्यस्योत्तरभागे स्थापयेत्। आपस्तम्बस्तु स्थापितपात्रस्य समन्त्रकं पूरण माह[2]; इह तु ब्राह्मणे पूरितस्य स्थापनम्। अतस्तथैवोक्तं कात्यायनेन— "गार्हपत्य मुत्तरेणोदपात्रं निधाय"-इति[3]।

अवश्यं प्राङ् नेतव्याना मपां[4] किं गार्हपत्यस्योत्तरदेशे स्थापनेनेत्याशङ्क्य तत्प्रयोजनकथनेन स्तौति— "योषा वा आप इति। अप्-शब्दस्य स्त्रीलिङ्गत्वात्। वृषेति, अग्निशब्दस्य पुंल्लिङ्गत्वात्। "गृहपतिना संयुक्ते ञ्यः[5]"-इत्यग्निविशेषो गार्हपत्यः। तदावास इह लक्षणया गार्हपत्य उच्यते। अत एव तस्य गृहत्व मुक्तम्— "गृहा वै गार्हपत्यः"-इति[6]।

उदपात्रस्थापनं प्रयोजनान्तरेण स्तौति— "वज्रं वा इति। 'अप्रतिष्ठितः' असम्बद्धः। "नैन मिति। त मेन मशक्तम्, अनुद्यन्तारं 'संशृणाति' हिनस्ति। "शृ हिंसायाम्[7]", "प्वादीनां ह्रस्वः[8]"। अतो हिंसापरिहाराय स्वयं सन्नद्ध एवोद्यच्छेत॥ १८॥

उद्यन्तुः प्रतिष्ठा मुक्त्वा उद्यन्तव्यस्यापि प्रतिष्ठा माह— "स यदिति। "गृहा वै प्रतिष्ठेति। कोणे स्थापितस्याग्नेरिव[9] वातादिस्पर्शविरहात्तैरण्यस्याविनाशो वज्रस्य प्रतिष्ठा।

१— ठ-पुस्तकादन्यत्र नैते पदे स्तः। २— श्रौ० सू० ४. १. ४।

३— श्रौ० सू० २. ३. १। एता एवापः प्रणीता उच्यन्ते।

४— 'निधाय"-इति 'अवश्यं प्राङ् नेतव्याः। अपां'-इति ज, झ, ञ, ट।

५— पा० सू० ४. ४. ९०। ६— ९पृ० ८ पं० द्रष्टव्यम्।

७— क्र्या० प०। ८— पा० सू० ७. ३. ८०।

९— 'स्थापितस्याग्नेरिव'-इति ज, झ, ञ, ट।

•तीक्ष्णीभूतः स वज्रः स्वप्रयोक्तुरभिमतफलनिष्पादनात् तद्विरहदुःखात्मिकां हिंसा मस्य न करोतीत्याह— "तयो हेति। गार्हपत्योपश्लिष्टे तदुत्तरभागे। 'वटे गावः सुशेरते'-इति-वदौपश्लेषिकाधिकरणे सप्तमी[1] ॥१९॥

सादिताना मपां प्रणयन माह— "ता इति। आहवनीयस्य सन्निहितोत्तरभागे 'प्रणयति' नीत्वा सादयति[2]। "एनबन्यतरस्या मदूरे पञ्चम्याः"-इत्यनेन एनप्[3]। "एनपा द्वितीया"-इति[4] षष्ठ्यर्थे द्वितीया। अपा मग्नेश्च मिथुनता मुपपादयति— "एव मिव हि मिथुनं क्लृप्त मिति ॥२०॥

ता नान्तरेणेति। अन्तरेणेतिबलादग्नि मिति लभ्यते। तासा मपा मग्नेश्च मध्ये[5] न सञ्चरेयुरित्यर्थः। तत्र कारण माह— "नेदिति। इदिति परिभये। "अथापि नेत्येष इदित्येतेन सम्प्रयुज्यते परिभये"-इति हि निरुक्तम्[6]। सञ्चारे हि चर्यमाणं मिथुन मन्तरेण परस्परं सङ्गतयोः स्त्रीपुंसयोर्मध्ये सञ्चारान्मिथुनविच्छेदलक्षणा भीतिः 'सञ्चरान्' सञ्चरेयुरिति। (हेतुहेतुमद्भावरूपे[7]) लिङर्थे[8]

१— पा० सू० १. ४. ४५। 'औपश्लेषिको वैषयिको ऽभिव्यापकश्चेत्याधारस्त्रिधा'-इति सि० कौ०।

२— "गार्हपत्यसमीपादाहवनीयसमीपं नीत्वा" का० २. ३. ३ वृ०।

३— पा० सू० ५. ३. ३५। ४— पा० सू० २. ३. ३१।

५— 'प्रणीताहवनीययोरन्तरालेन'-इति का०श्रौ०सू० २. ३. ४ वृ०।

६— नैघ० १. २. ६। "सर्वतो भयं परिभयम्"-इति तद्वृत्तौ।

७— नास्त्येतत् पदं ठ-पुस्तके। ८— 'लिङ्र्थे'-इति ठ, ढ।

लेट्[१] झेरन्तादेशः[२], "इतश्च लोपः[३]"–इतीकारलोपे, संयोगान्त-लोपः[४], तस्यासिद्धत्वान्नलोपाभावः[५]।

साक्षादुत्तरभागे आहवनीयप्रणयनं विवक्षित मिति दर्शयितुं ततः प्राक्प्रत्यगासादनं[६] निषेधति— "ता नातिहृत्येति। 'अतिहृत्य' उत्तरभाग मतीत्य प्राग्भागे। 'अनाप्ताः' उत्तरभाग मप्राप्ताः, प्रत्यगपि[७] नासादयेत्।

तदतिहरणपक्ष मनुवदति— "स यदिति।

तत्र दोषं वक्तु मुपोद्घात माह— "अस्ति वा इति। "व्यन् सपत्ने"–इति[८] स्मृतेः 'भ्रातृव्यः' शत्रुः, तस्य भावो 'भ्रातृव्यम्' (शात्रवम्[९]) युवादित्वाद्भावे अण्[१०], विशिष्टं भ्रातृव्यम्। अग्नेरपां च परस्परविनाशकत्वात् महदस्ति वैर मित्यर्थः। अस्तु, किं तत इत्याह— "स यथेवेति। 'तत्' अद्भिः सह महद्वैर मग्नेर्यथा 'भवति' स्वकार्यनिर्वापणरूप मुपद्रवं कर्त्तुं प्रभवति, तथा 'सः' अतिहरन् अध्वर्युः कुर्यादित्यर्थः।

१— पा० सू० ३. ३. १५६, पा० सू० ३. ४. ७।

२— पा० सू० ७. १. ३। 'सञ्चारान्मिथुनलक्षणा भीतिः। सञ्चारान्न-सञ्चरेयुरिति हेतुः। हेतुसद्भावरूपे लिङर्थे लेट्। झाकारोऽन्ता-देशः'–इति ज, झ, ञ, ट, ड।

३— पा० सू० ३. ४. ९७।

४— पा० सू० ८. २. २३।

५— पा० सू० ८. २. १।

६— 'प्राक्प्रत्यग्भागासादनं'–इति ढ।

७— 'प्रत्यगेव'–इति ढ।

८— पा० सू० ४. १. १४५।

९— नास्त्येतत्पदं ड-ढ-पुस्तकयोः।

१०— 'हायनान्तयुवादिभ्योऽण्'–इति पा० सू० ५. १. १३०।

तथा ऽकरणे का हानिः? तत्राह— "यत्रेति। 'यत्र' कर्मणि 'अस्य' प्रणयनपात्रस्य सम्बन्धिनीरप उपस्पृशन्ति ऋत्विग्यजमानाः। तत्रोपस्पर्शने सत्यग्नौ 'भ्रातृव्यं' शत्रु मुदकलक्षणं 'वर्द्धयेत्' उत्तेजयेत्। अतिहरणस्य वैरकरणसम्बन्धार्थः प्रथमोऽनुवादः, चरमस्तु भ्रातृव्य-वर्द्धनसमर्थनार्थं इत्यपौनरुक्त्यम्।

अतिहरणपक्षे दोष उक्तः, अनाप्तिपक्षे दोष माह— "यद्यु इति। स्वसमये अप्राप्तत्वात्[१] तासा मपां कामप्रापकत्वं दूरापास्त मित्यर्थः।

इत्थं (तम्[२]) उपोद्घात मुक्त्वा औपोद्घातिक माह— "तस्मादिति। 'सम्प्रत्येवं' सम्यगुत्तरभाग एव, न पुरतो न पश्चात्। अत उक्तं कात्यायनेन "उत्तरेणाहवनीयꣳ सम्प्रति निदधाति"-इति[३] ॥ २१ ॥

प्रणीताप्रणयनानन्तरं परिस्तरणं पात्रासादनं चाह— "अथ तृणैरित्यादि। 'द्वन्द्वं' द्वे द्वे। "द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु"-इति[४] निपातितम्। पात्रपदं यज्ञ-निर्वर्त्तकानां स्फ्यादीनाम् अप्युपलक्षकम्[५]।

अर्थतः प्राप्तां सङ्ख्या मनूद्य प्रशंसति— "तद्दशेति। तस्मिन् प्रयोगे एवं परिगणने कृते दश सम्पद्यन्ते। विराजश्छन्दसो[६] ऽक्षरेषु दशत्व मस्ति। प्रथमस्य यज्ञो ज्योतिष्टोमः। "एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः"-इतिश्रुतेः[७]। तत्र च नवत्युत्तरशत-

---

१— 'स्वसमयप्राप्तत्वात्'-इति ज, झ, ञ, ट।

२— नास्त्येतत् पदं ड-ढ-पुस्तकयोः।

३— श्रौ०सू० २. ३. ३।

४— पा० सू० ८. १. १५।

५— 'अप्युपलक्षणम्'-इति ठ।

६— 'विराट्छन्दसो'-इति ड।

७— ता०ब्रा०१६. १। ऐ०ब्रा० ३. ४. ५। तै०सं० ७. ४. १०, ११।

सङ्ख्याकाः स्तोत्रियाः। तास्त्रिकोनविंशतिसङ्ख्यया विभज्यमानास्तु दश लभ्यन्त इत्यस्ति तत्रापि दश सङ्ख्या। अतो दशसङ्ख्यायोगाद् विराड्यज्ञयोरेकत्वादिह दशसङ्ख्यासम्पत्त्या विराडात्मको यज्ञ एव साकल्येन सम्पादितो भवति।

एवं दशत्वं स्तुत्वा द्विशः प्रयोग मनूद्य स्तौति— "अथ यदिति। 'संरभेते' "रभ राभस्ये", राभस्यं कार्योपक्रमः; किं मपि कार्यं कर्त्तु मुपक्रमेते ॥ २१ ॥ १ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

माध्यन्दिनशतपथभाष्ये[1] प्रथमाध्याये

प्रथमं ब्राह्मणम्[2] ॥

१— 'माध्यन्दिनशतपथब्राह्मणे'—इति ज, झ, ञ, ट, ड।

२— व्रतोपायनादनन्तर मपां प्रणयनम्। तत्पद्धतिश्चैषा।— अध्वर्युर्वारणं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तेनोदपात्रेण स्वयं तस्मिन्नुदक मासिच्य दक्षिणहस्तेन चमसं गार्हपत्यस्योत्तरतो निधाय 'ब्रह्मन्नपः प्रणेष्यामि?'— इति ब्रह्माणं पृच्छति। 'वाचं यच्छ'—इति यजमानं प्रेष्यति। ब्रह्मा 'प्रणय यज्ञमित्यादि (२. २. ८.) उपांशु पठित्वा 'ओं प्रणय'—इत्युच्चै रनुज्ञां करोति, यथाध्वर्युः शृणोति। ततोऽध्वर्युश्चमसं गृहीत्वा आहवनीया- दुत्तरस्यां दिशि वहिर्वेदि दर्भेषु प्रणीताचमसं निदधाति। एतदेव प्रणीता- प्रणयनं चोच्यते। प्रणीताप्रणयनादनन्तरं प्रागग्रैरुदगग्रैश्च दर्भैराहवनीयस्य परिस्तरणं भवति; गार्हपत्यस्य तु प्रथमं पुरस्तादुदगग्रैः, ततो दक्षिणतः प्रागग्रैः, पश्चादुदगग्रैः, उत्तरतः प्रागग्रैर्दर्भैः परिस्तरणम्। ततः पात्रा- सादनम्। तच्च शूर्पादिपात्राणां समीपे स्थापनम्। तत्पद्धतिश्चैवम्।— अध्वर्युर्यजमानो वा द्वे द्वे पात्राणि गृहीत्वा विनियोगक्रमेण आहवनीये गार्हपत्ये वा यत्र हविः श्रपणं करिष्यन् भवति, तस्योत्तरतः पश्चाद्वा निद- धाति। एतान्येव चत्वारि कर्माणीह प्रथमब्राह्मणे आम्नातानि।

अथ शूर्प्पञ्चाग्निहोत्रहवणीञ्चादत्ते। कर्म्मणे वां व्वेषाय वामिति यज्ञो वै कर्म्म यज्ञाय हि तस्मादाह कर्म्मणे वामिति व्वेषाय वामिति व्वेवेष्टीव हि यज्ञम्* ॥ १ ॥

अथ व्वाचं यच्छति। वाग्वै यज्ञोऽविक्षुब्धो यज्ञं तनवा इत्यथ प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥ २ ॥

देवा ह वै यज्ञं तन्वानाः। तेऽसुररक्षसेभ्य आसङ्गाद् बिभयाञ्चक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति† ॥ ३ ॥

अथ प्रैति। उर्व्वन्तरिक्ष मन्वेमीत्यन्तरिक्षं वा अनु रक्षश्चरत्यमूल मुभयतः परिच्छिन्नं यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्ष मनुचरति तद् ब्रह्मणैवैतदन्तरिक्ष मभय मनाष्ट्रं कुरुते ॥ ४ ॥

स वा अनस एव गृह्णीयात्। अनो ह वा अग्रे पश्चेव वा इदं यच्छालꣳ स यदेवाग्रे तत्करवाणीति तस्मादनस एव गृह्णीयात् ॥ ५ ॥

भूमा वा अनः। भूमा हि वा अनस्तस्माद्यदा

* 'यज्ञम्'—इति ग, घ।   † 'रक्षाꣳस्यपहन्ति'—इति क

बहु भवत्यनोवाह्य मभूदित्याहुस्तद् भूमान मेवैतदु-
पैति तस्मादनस एव गृह्णीयात् ॥ ६ ॥

यज्ञो वा ऽअनः । यज्ञो हि वा ऽअनस्तस्मादनस एव यजूꣳषि सन्ति न कोष्ठस्य न कुम्भ्यै भस्त्रायै ह स्मर्षयो गृह्णन्ति तदृषीन् प्रति भस्त्रायै यजूꣳष्यासुस्तान्येतर्हि प्राकृतानि यज्ञाद्यज्ञं निर्मिमा* ऽइति तस्मादनस एव गृह्णीयात् ॥ ७ ॥

उतो पात्र्यै गृह्णन्ति† । अनन्तराय मु तर्हि यजूꣳषि जपेत् स्फ्य मु तर्ह्यधस्तादुपोह्य‡ गृह्णीयाद्युतो युनजाम ततो व्विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो व्विमुञ्चति ॥ ८ ॥

तस्य वा ऽएतस्यानसः । अग्निरेव धूरग्निर्हि वै धूरथ य ऽएनद्वहन्त्यग्निदग्ध मिवैषां व्वहं भवत्यथ यञ्जघनेन कस्तम्भीं प्रऽउगं व्वेदिरेवास्य सा नीड एव हविर्धानम् ॥ ९ ॥

स धुर मभिमृशति । धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं व्वयं धूर्वाम इत्यग्निर्वा

---

* 'निर्ममा'—इति क, भाष्यसम्मतश्च । † 'गृह्णन्ति'—इति ख ।
‡ 'तर्ह्यवस्तादुपोह्य'—इति ङ । 'तर्ह्यवस्तदुपोह्य'—इति च ।

ऽएष धुर्य*स्तु मेतदत्येष्यन् भवति हविर्ग्रहीष्यंस्तस्मा ऽएवैतान् निह्नुते तथो हैत मेषो ऽतियन्त मग्निर्धुर्यो न हिनस्ति ॥ १० ॥

तद्ध स्मैतदारुणिराह । अर्द्धमासशो वा ऽअहꣳ सपत्नान् धूर्वामीत्येतद्ध स्म स तदभ्याह ॥ ११ ॥

अथ जघनेन कस्तम्भी मीषा मभिमृश्य जपति । देवाना मसि व्वह्नितमꣳ सस्नितमं प्रप्रितमं जुष्टतमं देवहूतमम् । अह्रुत मसि हविर्द्धानं दृꣳहस्व माह्वारित्युन एवैतदुपस्तौत्युपस्तुताद्धातमनसो‡ हविर्ग्रहानीति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदह्वला माशास्ते ॥ १२ ॥

अथाक्रमते । व्विष्णुस्त्वा क्रमता मिति यज्ञो वै व्विष्णुः स देवेभ्य इमां व्विक्रान्तिं व्विचक्रमे यैषा मियं व्विक्रान्तिरिद मेव प्रथमेन पदेन पस्पाराथेद मन्तरिक्षं द्वितीयेन दिव मुत्तमेनैताम्वेवैष एतस्मै व्विष्णुर्यज्ञो व्विक्रान्तिं व्विक्रमते ॥ १३ ॥

अथ प्रेक्षते । उरु व्वातायेति प्राणो वै व्वातस्तद् ब्रह्मणैवैतत्प्राणाय व्वातायोरुगायं कुरुते ॥ १४ ॥

* 'धूर्य'—इति ख ।   † 'हविर्ग्रहीष्यं'—इति क ।

‡ 'ह्वातमनसो'—इति सायणसम्मतोऽपि न क्वापि मूलपुस्तके दृश्यते ।

अथापास्यति*। अपहतꣳ रक्ष इति यद्वेव किञ्चि-द्वापन्नं भवति यद्वु नाभ्येव मृशेत् तन्नाष्ट्रा एवैत-द्रक्षाꣳस्यतो ऽपहन्ति† ॥ १५ ॥

अथाभिपद्यते। यच्छन्तां पञ्चेति पञ्च वा ऽइमा अङ्गुलयः पाङ्क्तो वै यज्ञस्तद्यज्ञ मेवैतदत्र दधाति‡ ॥ १६ ॥

अथ गृह्णाति। देवस्य त्वा सवितुः प्रसवे ऽश्विनो-र्बाहुभ्यां पूष्णो हस्ताभ्या मग्नये जुष्टं गृह्णामीति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतद् गृह्णात्य-श्विनोर्बाहुभ्या मित्यश्विनावध्वर्यू पूष्णो हस्ताभ्या मिति पूषा भागदुघो ऽशनं पाणिभ्या मुपनिधाता सत्यं देवा अनृतं मनुष्यास्तत्सत्येनैवैतद् गृह्णाति§ ॥ १७ ॥

अथ देवताया ऽआदिशति। सर्वा ह वै देवता अध्वर्युꣳ हविर्ग्रहीष्यन्त मुपतिष्ठन्ते मम नाम ग्र¶हीष्यति मम नाम ग्र¶हीष्यतीति ताभ्य एवैतत् सह॥ सतीभ्यो** ऽसमदं करोति ॥ १८ ॥

यद्देव देवताया ऽआदिशति। यावतीभ्यो ह वै देवताभ्यो हवीꣳषि गृह्यन्त ऽऋणमु हैव तास्तेन

* 'ति'—इति ख। † 'न्ति—'इति ख। ‡ 'ति'—इति ख।
§ 'ति'—इति क। ¶ 'ग्र'—इति ग।
|| नास्त्येतत् पदं क-ख-पुस्तकयोः। ** एतदपि पदं ख-पुस्तके नास्ति।

मन्यन्ते यदस्मै तं कामꣳ समर्द्धयेयुर्यत्काम्या गृह्णाति तस्माद्वै देवताया ऽआदिशत्येव मेव यथापूर्वꣳ हवीꣳषि गृहीत्वा* ॥ १९ ॥

अथाभिमृशति । भूताय त्वा नारातय ऽइति तद्यत एव गृह्णाति तदेवैतत्पुनराप्याययति ॥ २० ॥

अथ प्राङ् प्रेक्षते । स्वरभिविख्येष मिति परिवृत मिव वा ऽएतदनो भवति तदस्यैतच्चक्षुः पाप्मगृहीत मिव भवति यज्ञो वै स्वरहर्देवाः सूर्य्यस्तत्स्वरेवैतदतो ऽभिविपश्यति ॥ २१ ॥

अथावरोहति । दृꣳहन्तां दुर्याः पृथिव्या मिति गृहा वै दुर्यास्ते हैत† ईश्वरो गृहा यजमानस्य यो ऽस्यैषो ऽध्वर्युर्यज्ञेन चरति तं प्रयन्त मनु प्रच्योतोस्त-स्येश्वरः कुलं विक्षोब्धो‡स्तानेवैतदस्यां पृथिव्यां दृꣳहति तथा नानुप्रच्यवन्ते§ तथा न व्यिक्षोभन्ते तस्मादाह दृꣳहन्तां दुर्याः पृथिव्या मित्यथ प्रैत्युर्व्वन्तरिक्ष मन्वे-मीति सो ऽसावेव बन्धुः ॥ २२ ॥

स यस्य गार्हपत्ये हवीꣳषि श्रपयन्ति । गार्हपत्ये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्हि गार्हपत्यꣳ

* 'त्वा'—इति ख, च । † 'हैत'—इति च, भाष्यसम्मतश्च ।

‡ 'विक्षुब्धो'—इति ख । § 'प्रच्यवते'—इति ख ।

सादयेद्यस्याहवनीये हवीꣳषि श्रपयन्त्याहवनीये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्ह्याहवनीयꣳ सादयेत् पृथिव्यास्त्वा नाभौ सादयामीति मध्यं वै नाभिर्म्मध्य मभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामी*त्यदित्या ऽउपस्थ ऽइत्युपस्थ ऽइवैनदभार्षुरिति वा ऽआहुर्यत्सुगुप्तं गोपायन्ति तस्मादाहादित्या ऽउपस्थ इत्यग्ने हव्यꣳ रक्षेति तदग्नये चैवैतद्धविः परिददाति गुप्त्या ऽअस्यै च पृथिव्यै तस्मादाहाग्ने हव्यꣳ रक्षेति ॥ २३ ॥ २ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा द्वितीयं)

ब्राह्मणम् ॥ १ । २ ॥

पात्रासादनानन्तरं कर्त्तव्य माह—"अथ शूर्प मिति। एतच्चादानं हविर्निर्वापार्थम्[१]। वामिति[२] मन्त्रगतद्विवचनलिङ्गात् उभे सह आदीयेते। अत एव सूत्रे—"शूर्पाग्निहोत्रहवण्यादाय"—इति[३]। इतरेतरयोग-द्वन्द्वः।

यज्ञो वा इत्यादि। यज्ञाय हि तदादानम्; अतः कर्मशब्दः कर्ममात्रपरोऽपि तद्विशेषं यज्ञ मेव ब्रूते। इज्यते अनेनेति 'यज्ञः' हविः; तदिह निर्वापकाले व्रीहिरूपम्। तदग्निहोत्रहवण्या

* 'मी'—इति ख। १— "अथ हविरावपति"—इतीहैव ७. ८।
२— वा० सं० १. ९. ५। ३— का० श्रौ० सू० २. ३. १०।

शूर्पे निर्वपन्[१] 'वेवेष्टीव' परिवेषणं करोतीव। यथान्नं दर्व्या भोजनपात्रे। अतो वेषाय वा मित्युक्तम्[२]। वेवेष्टीत्यत्र परि-रूपोपसर्गो लुप्तो निर्दिष्टः। "विषॢ व्याप्तौ"[३]। "निजां त्रयाणां गुणः श्लौ[४]"—इत्यभ्यासस्य गुणः।

अथ शूर्पं मित्यादि। अथ-शब्दादनुष्ठेयपदार्थपौर्वापर्यलक्षणं क्रम माह:। अतस्तद्विशिष्टाः पदार्था विधीयन्ते। ननु चैष चेदनुष्ठेयलक्षणः क्रमः, स च सर्वेषु पदार्थेष्वेक एव, नैकैकपदार्थग इति, तद्विशेषणतया तद्विधिभिः कथं विधातुं शक्यते? तर्हि सञ्जातविशेषणतया तद्विधानेनैव विधीयता मिति चेत्, न; सञ्जातस्याविधेयत्वात्; तस्य चैकत्वेन नियमेनानेकपदार्थाश्रितस्य क्रमस्यासम्भवात्। नैष दोषः। यथा संयोगादय एकैकवस्तुन्यपर्य-वसिता[५] अपि वस्त्वन्तर मपेक्ष्यैकत्रापि पर्यवस्यन्तः[६] तद्विशेषणतया तद्विधिभिर्विधीयन्ते, तद्वत् क्रमोऽपि किं न विधीयते[७]। न च शब्देनानभिधानादविधान मिति[८] मन्तव्यम्; प्राकृतोपकार[९]वद-नभिहितस्यापि वैतत्यलक्षणक्रमस्यार्थाद्[१०] बुद्धावुपस्थितस्य विधि-

१— 'निर्वपति'—इति ड। २— वा० सं० १. ६. ५।

३— जु० उ०। ४— पा० सू० ७. ४. ७५।

५— 'एकैकवस्तुपर्यवसिता'—इति ड। 'संयोगो द्विष्ठः'—इत्यादि ल०म०।

६— 'मपेक्ष्यैकत्रापर्यवस्यन्तः'—इति ड। ७— 'विधीयेत'—इति ड।

८— 'शब्देनानभिधान मिति'—इति ड।

९— 'प्रकृतौ एकार०'—इति ज, झ; 'प्रकृतौ प्रकार०'—इति ड।

१०— 'चैतदुपलक्षणक्रमस्यार्थाद्'—इति ड।

सम्भवात्। न चावश्यं वैतत्यलक्षण एव क्रमः; अस्ति ह्यथावानु-पूर्व्यलक्षणोऽपि। तथाच, यथा "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीति[1] क्त्वा-प्रत्ययेनाभिहितः पौर्वापर्य्यलक्षणः क्रम एवार्थविशेषणतया विधीयते, एव मत्र अथ-शब्दैरभिहितो विधीयत इति किं मुपपन्नम्? तदुक्तं जैमिनिना—"श्रुतिलक्षण मानुपूर्व्यं तत्प्रधानत्वात्"-इति[2] ॥ १ ॥

वाग्वै यज्ञ इति। यच्छति-पदसन्निधानान्नियम्यमानेवेह वाग् विवक्षिता; तस्याश्च यज्ञसाधनत्वाद्। यज्ञसाधनता मुपपादयति— "अविक्षुब्ध इति। वाङ्नियमे हि चित्तविक्षोभ[3]हेतोर्वाग्व्यव-हारस्याभावात् तदैकाग्र्ये सत्यविकलो यज्ञो यतः सम्पद्यते। क्षुभेरुदात्तोपदेशत्वे ऽप्यागमानुशासनस्यानित्यत्वादिड़भावः[4] (क्षुब्ध-स्वान्तेति[5] ज्ञापकात्)[6]। क्षुब्धेति[7] निपातितम्।

(शूर्पञ्चाग्निहोत्रहवणीञ्च प्रतपति[8]—) "अथ प्रतपतीति। शूर्प मग्निहोत्रहवणीं चेत्यनुषङ्गात् तदुभय मित्यर्थः। "निष्टप्ता अरातय इति वा"-इति। व्रीह्यनुष्ठानपक्षे यववाक्यस्य, (१) प्राप्त-प्रामाण्यत्यागः, (२) अप्राप्तप्रामाण्यस्वीकारः, (३) पुनर्यवानुष्ठाने स्वीकृतप्रामाण्यस्य त्यागः, (४) त्यक्तप्रामाण्यस्वीकारश्चेति चत्वारो

१— इहैवोपरिष्टात् दीक्षाप्रकरणं द्रष्टव्यम् (१२ का० १ प्र०)।

२— मी० सू० ५. १. १।

३— 'चित्तविक्षिप्त'-इति ञ, झ, ञ, ट, ठ; चित्तविक्षेप'-इति ड।

४— "आगमशास्त्र मनित्यम्"-इति प०शे० ९५ (८.४.१६. म०भा०)।

५— पा० सू० ७. २. १८।

६— नास्त्येष पाठः ठ-पुस्तके।

७— 'क्षुब्ध इति'-इति ठ।

८— नास्त्येतद्वाक्यं ठ-पुस्तकादन्यत्र।

दोषः। इत्थं व्रीहिवाक्येऽपि चत्वार इत्यष्टौ दोषा[१] यद्यपि, तथापि गत्यभावाद्विकल्प इत्युक्तं भट्टाचार्य्यैः[२]—

"एव मेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः।

विकल्प आश्रितस्तत्र गतिरन्या न विद्यते"—इति[३]।

इह पुनर्वाशब्देनाधस्तादप्यनुकृष्टेन मन्त्रद्वयपाक्षिकत्वस्य[४] श्रुत्यैवाभिधानान्नैकोऽपि दोषः। एतदर्थ मेव च "एकार्थास्तु विकल्पेरन्"—इति[५] व्रीहियववदेव न्यायप्राप्तस्यापि विकल्पस्य, वेति स्वशब्देनोपादानम् ॥ २ ॥

मन्त्रकरणकतायै साध्यस्य निरासस्योपयोगसिद्धये निरसनौयानां प्रसक्ति माह— "देवा ह वा इति। 'असुररक्षसेभ्यः'—इति षष्ठ्यर्थे चतुर्थी[६]। तेषाम् 'आसङ्गात्' संसर्गाद्भीताः। बिभेतेर्लिटि

१— 'इत्यसौ दोषः'—इति ज, झ, ञ, ट, ठ,।

२— मीमांसायां भट्टमतपोषकाचार्यैरित्यर्थः। मी०भ० १२ अ० ३ पा०।

३— विकल्पो द्विविधः— व्यवस्थित ऐच्छिकश्चेति। तत्रेच्छाविकल्पे भट्टमते अष्टौ दोषा भवन्ति। तद्यथा— "प्रमाणत्वाप्रमाणत्वपरित्याग-प्रकल्पना। प्रत्युज्जीवनहानिभ्यां प्रत्येक मष्टदोषता"—इति। "व्रीहिभिर्यजेतेति वाक्यात् व्रीहयो नियम्यन्ते; एवं यवैर्यजेतेतिवाक्यात् यवा अपि नियम्यन्ते; तयो रेकार्थत्वाद् विकल्पः"—इत्यादि मी०प०।

४— "प्रतपनं प्रत्युष्टं निष्टप्त मिति वा"—इति का०श्रौ०सू० २. ३. ११। मन्त्रौ तु तै० वा० सं० १. ७. १, २।

५— मी० सू० १२. ३. १०। अस्मन्मते तु "मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यात्"—इति (२९) सूत्रस्यैवायं विषयः स्यात्।

६— पा० सू० २. ३. ६२. वा० १।

"भीरुग्ध्रीष्मिकृवाम्[1]"—इत्याम् प्रत्ययः, शुभावश्च। नाशयन्तीति 'नाष्ट्राः' आसुर्यः प्रजाः, ताश्च रक्षांसि च 'तत्' तेन तपनेन[2]। अतो 'यज्ञमुखात्' यज्ञप्रारम्भाद् अपघ्नन्ति। 'एतत्'—इति क्रियाविशेषणम् ॥ ३ ॥

अथ प्रैतीति। शूर्पप्रतपनानन्तरम् उर्विति[3] मन्त्रेण हविर्निर्वापार्थं शकटसमीपं 'प्रैति' प्रगच्छेत्। मन्त्रप्रयोजन माह—"अन्तरिक्षं वा इति। यथा वृक्षो मूलैः पृथिवी मनुप्रविष्टस्तिष्ठत्येव, न गच्छति; यथा व्याघ्रादिरभितः पाशाभ्यां बध्वा ध्रियमाणः[4]; नैवं पुरुषो मूलवान्; नाप्युभयतः केनचित् संसर्गिणा प्रतिबद्धः, किन्तु 'परिच्छिन्नः' प्रतिबन्धकासंसृष्टः सन् अन्तरिक्षे विस्रम्भं[5] चरति। तथैव निर्वप्स्यमानहविरादानार्थं रक्षोऽप्युक्तविशेषणविशिष्टं सत्त्वं[6] निर्वप्स्यन्तं पुरुष मनुगच्छेत्। अतस्तदेतत्पुरुषेण गम्यमान मन्तरिक्षप्रदेशं 'ब्रह्मणा' उर्वित्यनेनैव मन्त्रेण[8] 'अनाष्ट्रं' हिंसाकररहितम्[9], अत एवाभयं कुरुते। 'उरु' विस्तीर्णं प्रतिबन्धकरक्षोलक्षणमूर्त्तद्रव्यविरहादिति हि मन्त्रार्थः ॥ ४ ॥

अनस एव (न शालायाः[10]) सकाशाद्ग्रहणे, कारण माह—"अनो ह वा इति। अन एव हि प्रथमं धान्यस्याधिकरणम्।

१— पा० सू० ३. १. ३९। २— 'यज्ञेन'—इति ड।
३— वा० सं० १. ७. ३। ४— 'ध्रियमाणः'—इति ज, झ, ञ, ट, ढ।
५— विस्रम्भं'—इति ठ, ड। ६— 'सत् तं'—इति ठ, ड।
७— 'मन्तरिक्षं'—इति ढ। ८— वा० सू० १. ७. ३।
९— 'हिंसकरहितम्'—इति ठ। १०—नास्त्येष पाठो ढ-पुस्तकादन्यत्र।

अनसः सकाशादानीयमानं धान्यं 'पश्चेव' पश्चादेव। किं तत्? यत् 'शालं' एतत्[१] शालागतं भवति। "पश्चपश्चा च छन्दसि"-इति[२] निपातितम्। शालाशब्दाच्छान्दसत्वेन छस्य विकल्पितत्वादण्। यत् 'अग्रे' गृहप्रवेशात् प्राक्, अनसि स्थितम्। अत एव गृहिणा माशया[३] अनुपहतं तदेव यज्ञसाधनं करवाणीति योग्यत्वे[४] हेतुः। तस्मादनस एव सकाशात् सोऽध्वर्युर्गृह्णीयात्त शालातः॥ ५॥

अथानसोऽप्यग्रे खलादानीयमानं मूतस्थ मेव किं न निरूप्यते? इत्यत आह— "भूमा वा इति। मूतस्थं ह्येवाल्पम्[५], ततो निरूप्यमाणं हविः हिंसितभिक्षावद्देवा न गृह्णीयुः। अपि स्मर्यते हि—

"आत्मानं पीड़यित्वा तु भिक्षां यः सम्प्रयच्छति।
सा भिक्षा हिंसिता ज्ञेया न सा ग्राह्या कदाचन"-इति॥

बहोर्भावः 'भूमा'[६]। भवितरि भावोपचारः अतिशयार्थः; मूर्त्तिभूतं ब्रह्मण्य मेवायं पुनातीतिवद्। अतो बहुतरं भूमा अन इत्यर्थः। तस्यार्थे लोकप्रसिद्धि माह— "भूमा हीति। प्रसिद्धिं लोकव्यवहारेण साधयति— 'अनोवाह्यम्' अनसा वोढु मर्हं तदि-त्यादि। तदेतदनस्स्थं हविरुपयच्छन् भूयिष्ठ मेवोपैति। अतो हिंसित-भिक्षा निराकृता॥ ६॥

१— 'एतत (B. पतते A. C. !!)'-इति ढ।

२— पा० सू० ५. ३. ३३। ३— 'माशय'-इति ढ।

४— 'योऽय मनसो ग्रहणे'-इति ड।

५— मूतम् = बद्धम्, मूतस्थम् = बद्धावस्थम्। अम० को० २. १. ६५।

६— पा० सू० ६. ४. १५८।

अनस एव ग्रहणे हेत्वन्तर माह— "यज्ञो वा इति। यज्ञ-साधनत्वादनसि साधनस्तुत्यै यज्ञत्वोपचारः। इज्यते अनेनेति करणे एव वा नङ् प्रत्ययः[१]। वै-शब्दस्तस्य विधिश्रुतिसिद्धं यज्ञसाधनत्वं स्तोतुं स्मारयति।

न केवलं श्रुतिसिद्धं तस्य तत्साधनत्वम्, अपि तु प्रत्यक्षादि-प्रमाणैरपि तस्य साधनत्वं सिद्ध मित्याह— "यज्ञो हीति।

अनसोऽसाधारण्ये हेत्वन्तर माह— "तस्मादिति। यस्मादनस एव ग्रहणम्, तस्माद्ग्रहणमन्त्राः "धूरसि ध्रुत मसि हविर्द्धान मित्यादयः[२] अनोऽवयवलिङ्गा दृश्यन्ते; न पुनः कोष्ठगतस्य कुम्भी-गतस्य वा धान्यस्य। कुम्भी-शब्दस्तन्निष्ठं धान्यं लक्षयति, "मञ्चाः क्रोशन्तीतिवत्[३]। लुप्तनिर्दिष्टा षष्ठी।

ऋषिमत माह—"भस्त्राया इति। षष्ठ्यर्थे चतुर्थी[४]।

तस्मिन् पक्षे भस्त्रायाः के मन्त्रा इत्याह— "तद्वषीनि। उक्तार्थं। तदा तु तान्येव यजूंषि भस्त्रायाः[५] प्रतिपादकानि स्युरि-त्यर्थः। अनःपक्षे हे अनः! यत् त्वं 'धूरसि' त्व मुद्धृत मतुलं हविर्द्धान मसीति। भस्त्रापक्षे[६] तु हे भस्त्रे! इत्येव विशेषः[७]।

१— पा० सू० ३. ३. ६०। २— वा० सं० १. ८. १, २; ६. १।
३— "तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च। तत्साहचर्यात् तादर्थ्याज् ज्ञेया वै लक्षणा बुधैः"—इत्यादि ल० म०।
४— पा०सू० २. ३. ६२. वा० १। ५— 'यज्ञभस्त्रायाः'—इति ज, ७।
६ — भस्त्रा चर्मनिर्मितं पात्रम्, तदेवेह पात्रीत्युच्यते।
७— एतच्च पक्षद्वयं का० श्रौ० सू० २. ३. ३८ द्रष्टव्यम्।

मन्त्रदारिद्र्य इव कस्मात्तान्येव ! अन्यानि चेत्, भस्त्रायाः के मन्त्रा इत्यत आह[१]—"तान्येतर्हीति । तैरेव यजुर्भिर्ग्रहणे[२] यानि यजूंषि प्रकृतावनस्यासन्, तान्येवैवं सति विकृतौ भस्त्राया मपि[३] स्युः !

तथात्वस्यापि किं फल मिति चेत् तत्राह— "यज्ञादिति । यज्ञसाधन मन आश्रित्य सकृत्प्रयुज्य तत इद मुक्त्वैव[४] यज्ञं भस्त्रादिकं 'निर्ममे' अनुतिष्ठानि इत्येव मनुष्ठातुराशय इत्यर्थः ।

ननु प्रकृतावेव पत्रान्तरं भस्त्रा यथा यवः[५], तत् कि मुच्यते प्राकृतानीति । सत्यम् ! प्राकृत मुपदिश्यमानं यथा प्रथमं वैकृतन्त्वतिदेशाच्चरमं प्रतीयते, एवं स्वशब्देनाभिधानात्प्रथमप्रतिपत्तेरेव प्राकृत मुच्यते ; तल्लच्चितापूर्वसाधनत्वात्तु पश्चात्प्रतीतेर्भस्त्राविकृतिवद्विकृतिः ; अतो भस्त्राया मपि यववदुपदेशादेव धर्मसम्बन्धो ातिदेशात् । व्रीहीनवहन्तीति अपूर्वं व्रीहयः प्रकृतिद्रव्य मवहन्तीति यथा, तथानेन पदेनापि भस्त्राविपरिग्रह इति ॥ ७ ॥

पात्रीतो ग्रहणे धर्मविशेष माह— "उतो पात्र्यै इति । 'उतो' अपि तु यदि पात्र्या[६] गृह्णीयात्[७], तदा धूरीषाद्यभावेन तदुप-

१— 'अन्यानि कानि चित् भस्त्रायाः किं न विधीयन्त इत्यत आह—' —इति ठ ।　　　२— 'एतर्ह्यपि तैरेव यजुर्भिर्ग्रहणम्'—इति ठ ।

३— 'विहितभस्त्राया'—इति ठ, 'तान्येव भस्त्राया मपि'— इति ढ ।

४— 'सकृत्सकृत्प्रयुज्यत इद मुक्त्वैव'—इति ज, 'सकृत्प्रयुज्यत इदमुक्त्वैव'—इति झ, 'सकृत्प्रयुज्य तदनुक्त्वैव'—इति ढ ।

५ — 'भस्त्रात्तु यथा यवः'—इति ज, झ, ञ, ट ; 'भस्त्रा न तु विकृतौ यथा यवाः'—इति ठ ।　　　६ — 'पात्र्यां'—इति ज, झ ।

७— "(पात्र्यै) पञ्चम्यर्थे चतुर्थी । पात्र्याः"—इति का०सू०वृ० (२.३.२८.) ।

स्थानविरहादननुष्ठानकृतं[1] व्यवधान मन्तराय मन्तरेण[2] तत्प्रकाशक-यजूंषि "धूरसि"-"देवानामसि"-इत्यादीनि[3] जपेत् ।

तत्रैव धर्मान्तर माह— "स्फ्य मु तर्हीति । तस्मिन् पात्रीपक्षे तस्या अधस्तात् स्फ्य मुपनिधाय[4] गृह्णीयात् । यदाह कात्यायनः— "पात्र्यां वा स्फ्योपहितायां धुरीषारोहणानि पात्रीविले जपतीति[5]। अनसो ग्रहणे[6] स्फ्योपहितपात्रीतो ग्रहणे ऽतिशयितं प्रयोजन माह— "यतो युनजामेति । योऽयं[7] स्फ्य माश्रित्य 'युनजाम' यज्ञेन योगं प्राप्तम्, ततस्तस्मिन्नेव स्फ्ये 'विमुञ्चाम'-इति वियोग मपि करवाम। योगवियोगसामानाधिकरण्यसिद्धिः । स्फ्योपहितपात्रीतो ग्रहणपक्षे अनःपक्षादतिशय इत्यर्थः ।

अथ मन्त्राभिप्रायः।— अनसो निर्वापपक्षे हि जुहूपभृतौ शकटस्य धुरोर्निदध्यात् । पात्रीतः पुनर्निर्वापे तदाधारभूते स्फ्ये तयो र्निधानं विमोकः। तदुक्तं कात्यायनेन— "घृताची ऽइति[8] धुरि निदधात्यनसि चेद्ग्रहणम्"-"स्फ्ये पात्र्यां चेत्"-इति[9]। तथा अपां

१— 'तदनुष्ठानविरहादनुष्ठानकृतं'-इति ठ ।
२— "अनन्तरायम्" (३६पृ० ८पं०) = अविच्छेदम् (का०श्रौ०२.३.२९.)।
३— वा० सं० १. ८. १, २; २, ९. १ । का० तै० २. ३. १३, १४ ।
४— "स्फ्यो नाम बाहुमात्रः खड्गाकारः काष्ठविशेषः"-इति तै० सं० १. ६. ८. २. सा० भा० । "स्फ्योऽस्याकृतिः"-इति का० श्रौ० सू० १. ३. ३९ । "खादिरः स्फ्यः"-इति चेहैव ३. ६. २. १२ ।
५— श्रौ० सू० २. ३. २८, २९ । ६— "ग्रहणादपि"-इति ड ।
७— 'योऽयं'-इति ज, झ, ञ, ट; 'यमेव'-इति ठ; 'योगं'-इति ड ।
८— वा० सं० २. १९. १ । ९— श्रौ० सू० ३. ६. १९, २० ।

प्रणयनं च स्फ्येन सहेत्युक्त मापस्तम्बेन— "स्फ्येनोपसङ्गृह्याविषिञ्चन् हरति"-इति[१]। एवञ्च स्फ्येनैव योगः, स्फ्य एव वियोगात्मको विमोकोऽपीति पाश्चात्तो ग्रहणे योगवियोगयोः सामानाधिकरण्य-लाभोऽतिशय इति ।

अथ तयोर्वैयधिकरण्यात् सामानाधिकरण्योक्तोऽतिशय इत्या-शङ्क्य लोकप्रसिद्ध्यनुसरण मतिशय इत्याह— "यतो ह्येवेति । सार्व-विभक्तिकस्तसिः[२]। यत्रैव योगः, तत्रैव वियोगो न्याय्यः; न हि कर्णे युक्तः, कक्ष्यां विमुच्यत इत्यर्थः ॥ ८ ॥

अथ धुरः समन्त्रक मभिमर्शनं विधास्यंस्तदुपोद्घातत्वेन देवता-रूपतां[३] तस्याः प्रतिपादयति— "तस्येत्यादिना ।

"अग्निरेव धूरिति यद्धुरोऽग्न्यात्मकत्वं प्रतिज्ञातम्, तस्योप-पादनम्— "अग्निर्ह वा इत्यादि । अनसो या धूर्बलीवर्दवहनस्थानं[४], तस्याग्न्यात्मकत्व मन्वयव्यतिरेकाभ्यां लोकप्रसिद्ध मिति 'हि'-शब्दार्थः ।

ता मेव प्रसिद्धिं दर्शयति— "अथ य एनदिति । 'एनद्' धुराख्यम्, अनसो योगे खलु बलीवर्दा वहन्ति, एषां 'वहं' वहन-साधनं स्कन्धरूप मङ्ग मग्निदग्ध मिव दृश्यते; अतो नूनं 'धूर्' वोढव्या धूः अग्न्यात्मिकेत्यवसीयत इत्यर्थः ।

१— श्रौ० सू० १. १९. ८ । २— पा० सू० ५. ३. १४ ।
३— 'देवतासूर्यतां'–इति ड; 'देवतासूयतां'–इति ढ ।
४— "युगस्य प्रान्तौ धूःशब्देनोच्येते, यावनडुत्स्कन्धयोरुपरि निधीयेते"– इति का० श्रौ० २. ३. १३ सू० वृ० ।

शकटाग्निर्वापस्य[1] प्राशस्त्यातिशयं द्योतयितुं तस्मिन् वेदिहविर्द्धानयोः सम्पत्ति माह— "अथ यज्ञघनेनेति। शकटस्याधःपतनं वारयितु मीषादण्डप्रोत्तम्भनार्थौ[2] मेथौ 'कस्तम्भौ'। ईषाद्वयं यत्र संसृष्टं, ततः प्रत्यग्भागः, तयोरीषयोर्मध्यदेशः 'प्रउगम्'[3]; तच्च पश्चाद् विस्तृतम्, पुरस्ताद्ध्रसीयः। 'वेदिः' अपि तथाविधा ;— "त्रिंशत्पदानि पश्चात्तिरश्ची भवति, षट्त्रिंशत् प्राची, चतुर्विंशतिः[4] पुरस्तात् तिरश्ची"-इति[5] श्रुतेः। अतस्तत्सारूप्यात्प्रउगस्य वेदित्वव्यपदेशः। "नीड़ एवेति। धान्यनिधानाय परिश्रितप्रदेशो 'नीड़ः'[6]; हविर्द्धानमपि परिश्रितम्[7]; परिश्रयणसाम्यात् नीड़स्य हविर्द्धानत्वम् ॥ ९ ॥

औपोद्घातिकं समन्त्रक मभिमर्शनं विधत्ते— "स धुर मिति।

अस्याभिमर्शनस्य प्रयोजन माह— "अग्निर्वा इति। युगस्य धुरि भवोऽग्निः 'धुर्यः'। "भवेच्छन्दसि"-इति[8] यत्। हविर्ग्रहणाय शकटस्य 'परिश्रितप्रदेशं' पश्चाद्भागं यास्यन्, 'तं' धुर्यं पौरस्त्यम्[9] अग्निमतिक्रमिष्यन् भवति। तदतिक्रमे च स क्रुध्येत्[10]। तस्य प्रसादनाय 'एतद्' "धूरसीति[11] मन्त्रोच्चारणेन 'तस्मै' एवाग्नये 'निह्नुते' अप-

१— 'शकटनिर्वापस्य'-इति ड, ढ। २— का०श्रौ०सू० ८. ४. ५. द्र०।

३— "प्रउगं प्राग्युग मीषान्तरम्"-इति का०श्रौ०सू० ७. ९. ५. द्र०।

४— 'चतुर्विंशतिं'-इति जादिषु। ५— तै० सं० ६. २. ५. ८।

६— "शकटस्योपस्थरूपः पश्चाद्भागः"-इति का०श्रौ०सू० ७. ९. ६ द्र०।

७— का० श्रौ० सू० ८. ३. २१ द्र०। ८— पा० सू० ४. ४. ११०।

९— 'धौरस्त्यम्'-इति ज, झ, ञ, ट; "धौरेयम्"-इति ठ।

१०— 'सङ्क्रुध्येत्'-इति ठ। ११— वा० सं० १. ८. १।

नयति; अतिक्रमजनितं स्वापराधं प्रशमय्य[1] प्रसादयति। "क्रुङ् अपनयने" धातुः (अदा० आ०)। "श्लाघ्ह्नुङ्स्थाशपाम्"-इति[2] तच्छब्दाच्चतुर्थी। यश्चास्माकं हिंसिता, योऽप्यस्माभिर्हिंस्यः, 'तं' द्विविधं शत्रु मेव 'धूर्व' हिंस्याः। योऽस्मानिति हि मन्त्रार्थः। तथा सत्येवं प्रार्थितोऽग्निरतिक्रामन्त मप्यध्वर्युं न बाधत इत्यर्थः॥ १०॥

तन्मन्त्रोच्चारणेन शत्रुहिंसनं महर्षिव्यवहारेण संवादयति—"तद्धेति। 'तत्' तत्राभिमर्शनविषये 'एतदारुणिराह स्म'। एतच्छब्दपरामृश्यं दर्शयति—"अर्द्धमासश इति। मासस्यार्द्धं मर्द्धमासः। "अर्द्धं नपुंसकम्"-इत्येकवद्भावः[3]। अर्द्धमासे ऽर्द्धमासे; पौर्णमास्यां दर्शे च। "सङ्ख्यैकवचनाच्च वीप्सायाम्"-इति[4] शस् प्रत्ययः। 'एतत् ह स्म'-इति ऋषेरभिप्रायकथनम्। 'एतत्' इति, धूरसीत्यभिमर्शन मित्यर्थः॥ ११॥

अथ समन्त्रक मीषाभिमर्शनं[5] विधत्ते—"अथ जघनेनेति। 'कस्तम्भी' व्याख्याता[6]। "अन एवेति। यद्यप्ययं मन्त्र ईषाभिमर्शने जप्यः, तथाप्यवयविस्तुत्या अवयवोऽपि स्तुतो भवति इत्यभिप्रेत्यैतन्मन्त्रवाक्यं वोढृतमत्वादिगुणकथनेन अन एवोपस्तौति[7]। अभिमृष्टव्येषा-परित्यागेन तदवयवि शकटं स्तुवतो ऽभिप्राय माह—"उप-

---

१— 'प्रशंस्य'-इति ज, झ, ञ, ट, ढ। २— पा० सू० १. ४. ३४।

३— पा० सू० २. २. २। ४— पा० सू० ५. ४. ४३।

५— शकटस्य दीर्घं काष्ठ मीषा, तदग्रस्य भूमिस्पर्शो मा भूदिति तदाधारत्वेन स्थापितं काष्ठ मुपस्तम्भनम्, तस्य पश्चाद्भागे ता मीषां स्पृशेदित्यर्थः। ६— ५०पृ० ३पं० द्रष्टव्या।

७— वा० सं० १. ८. २ मन्त्रः। का० श्रौ० सू० २. ३. १४।

स्तुतादित्यादिना। 'ध्मातं'[1] ह्वम्म्। देवानां ह्वानजनने दर्पान्न मित्यर्थः। "ध्मै ह्वार्थौ"-इति भौवादिको धातुः। "अह्वला माशास्ते"-इति। 'यज्ञपतिर्मा ह्वार्षीत्' कुटिलगतिर्मा भवत्विति मन्त्रवाक्ये प्रतिपादनात् ह्वरणनिषेध[2] एव 'अह्वला'-शब्दार्थः[3] ॥ १२ ॥

शकटस्यारोहणं विधत्ते— "अथाक्रमत इति। हे शकट! त्वां विष्णुरेवाक्रमताम्, नाह मिति मन्त्रार्थः[4]। विष्णोरेवाक्रमणं किमिति प्रार्थते? इति चेत्, तत्राह— "यज्ञो वा इत्यादि। विष्णोर्यज्ञस्य च व्यापनसामान्यात् तादात्म्यव्यपदेशः। 'एषां' देवाना मर्थे या 'इयं' वैष्णवी विक्रान्तिः, इमा मिति पूर्वत्रान्वयः। का पुनरिय मिति तां दर्शयति— "इद मेवेत्यादिना। त्रैविक्रमसमये 'इद मेव' परिदृश्यमानं पृथिव्याख्यं स्थानं प्रथमेन पादनिधानेन आक्रममाणः 'पस्पार' पालयामास[5]। "स्पृ प्रीतिपालनयोः"-इति धातुः। निगदसिद्ध मन्यत् ॥ १३ ॥

पुरोडाशीयानां व्रीहिणां समन्त्रक मवेक्षणं[7] विधत्ते— "अथ प्रेक्षत इति। "प्राणो वा इति। "वायुः प्राणो भूत्वा नासिके प्राविशत्"-इति[8] श्रुतेः प्राणवातयोरेकत्वम्। 'तत्' तथा सति

१— सर्वेष्वेव मूलपुस्तकेषु 'रातं' इत्येव पाठः। "रा दाने" अ० प०, "रै शब्दे" भू० प०। २— "ह्वरनिषेध"-इति डातिरिक्तेषु।

३— "ह्वल ह्मल चलने" भू० प०।

४— वा० सं० १. ९. ३ मन्त्रो द्रष्टव्यः। का० श्रौ० सू० २. ३. १५।

५— पुनरिहोपरिष्टात् ९. ३. ९. द्रष्टव्यम्। ६— स्वा० प०।

७— मन्त्रस्तु वा० सं० १. ९. ४। का० श्रौ० सू० २. ३. १६।

८— ऐ० आ० १. ४. २. ४।

'ब्रह्मणा' मन्त्रेणैव प्राणात्मकाय 'वाताय' एतत् 'उरुगायम्' उरु-भवनं कीर्त्तनम्[1] कुरुतेत्यर्थः ॥ १४ ॥

यद्यचेति । 'अत्र' पुरोडाशीयेषु व्रीहिषु यदि किञ्चित् तृणादिकम् 'आपन्नं' चिप्तं भवेत्, तत् "अपहतम्"-इति[2] मन्त्रेण निरस्येदित्यर्थः । यदि तु तत्र तृणादिकं न भवेत्, तदा पुरो-डाशीयं व्रीहिसमूह मेवानेन मन्त्रेण अभिमृशेदित्यर्थः ॥ १५ ॥

हविर्ग्रहणाय समन्त्रकं[3] स्पर्शनं विधत्ते— "अथाभिपद्यत इति । 'अभिपद्यते' आलभते, स्पृशति । हविर्गृहीतुं बध्नन्तु पञ्चाङ्गुलय इत्यर्थः । मन्त्रगतपञ्चशब्दार्थ माह— "पाङ्क्तो वा इति । "पञ्चपदा पङ्क्तिः[4]"; यज्ञोऽपि धानाकरम्भादिपञ्चहविष्क इति पञ्चसङ्ख्यायोग-साम्यात् 'पाङ्क्तः' । तथाच तैत्तिरीयकम्— "धानाः करम्भः परि-वापः पुरोडाशः पयस्या, तेन पङ्क्तिराप्यते; तद्यज्ञस्य पाङ्क्तत्वम्"-इति[5] । 'तत्' तथा सति 'एतत्' एतेन पञ्चशब्दोपेतमन्त्रोच्चारणेन 'अत्र' अस्मिन् शकटे 'पाङ्क्तं' यज्ञ मेव धारयतीत्यर्थः ॥ १६ ॥

१— 'उरुभवनकीर्त्तनम्'-इति ठ-पुस्तकादन्यत्र ।

२— वा० सं० १. ९. ५ । का० श्रौ० सू० २. ३. १७, १८ ।

३— वा० सं० १. ९. ६ । का० श्रौ० सू० २. ३. १९ ।

४— ऐ० ब्रा० ६. ४. ४ । पि० छ० सू० ५,६ ख०. १२ सूत्राणि । पञ्च पदानि परिमाणा मस्येत्यर्थे पा० सू० ५. १. ५९ ।

५— सं० ६. ५. ११. ८ । "भ्रष्टा यवा धानाः, आज्यसंयुक्ताः सक्तवः करम्भः, व्रीहिजन्या लाजाः परिवापाः, पिष्टविकारः पुरोडाशः, क्षीरविकारः पयस्या"-इति तै० सं० १. ४. २८ सा० भा० ।

अथ समन्त्रकं[1] हविर्ग्रहणं विधत्ते— "अथ गृह्णातीति। अनुष्ठेयहविर्ग्रहणानुगुण्यं मन्त्रस्य दर्शयति— "सविता वा इत्यादिना। 'देवानां' मध्ये 'सविता' खलु प्रसविता, स्वस्वव्यापारेषु सर्वस्य लोकस्य प्रेरयिता; "सूते प्रेरयतीति सविता"-इति[2] तन्नामव्युत्पत्तेः। 'अश्विनावध्वर्यू'-इति। पुरा खलु देवकर्तृके यज्ञे अश्विनाध्वर्यू अभूताम्, अतस्तयोरेव बाहुभ्यां हविर्गृह्णामीति अस्यार्थस्य प्रतिपादको मन्त्रभागो युक्त इत्यर्थः। 'पूषा भागदुघः'-इति। भागं दोग्धीति 'भागदुघः' भागप्रद इत्यर्थः। "दुहः कब् घश्च"-इति[3] कब्घत्वे। तादृशः पूषा पाणितलाभ्यां सर्वस्य जनस्य 'अशनं' भोज्य मन्नम् 'उपनिधाता' उपनिधातु मुपस्थापयितुं शीलवान्; ताच्छीलिकस्तृन्[4]। "न लोकाव्ययनिष्ठेति[5] कर्मणि षष्ठ्याः प्रतिषेधः। तथाच पूष-देवताया हस्ताभ्यां हविर्ग्रहणं युक्ततर मिति भावः इतोऽप्यश्विनोर्बाहुभ्या मित्यादिकं युक्त मित्याह— "सत्यं देवा इति। 'देवाः' इति यत्, तत् 'सत्यम्'; अमरणत्वेन विनाशाभावात्। मनुष्यास्तु तद्वैपरीत्यादनृतरूपाः। तस्मादश्विनोर्बाहुभ्या मित्यादिमन्त्रभागोच्चारणात् देवतारूपेण 'सत्येनैव' तद्धविर्ग्रहणं कृतं भवतीत्यर्थः॥ १७॥

१— वा० सं० १. १०. १। का० श्रौ० सू० २. ३. २०।
२— निघ० ५. ४. २० द्रष्टव्यम्। निरु० ७. ७. ६।
३— पा० सू० ३. २. ७०। ४— पा० सू० ३. २. १३५।
५— पा० सू० २. ३. ६९।

."अग्नये जुष्टम्"-इति[1] देवतादेशनस्यावश्यकर्त्तव्यतां प्रतिपादयति—"सर्वा ह वा इत्यादिना। स्वस्वनामग्रहणसम्भावनयोपस्थितानां मध्ये कस्याश्चिदग्न्यादिदेवताया आदेशने सति सह वर्त्तमानाः। 'ताभ्यः' षष्ठ्यर्थे चतुर्थी[2]। तासां देवतानाम् 'अघमदम्' अकलहं परस्पर मविरोधं करोति ॥ १८ ॥

प्रकारान्तरेणापि देवतादेशनस्य कर्त्तव्यतां प्रतिपादयति—"यावतीभ्य इति। यत्परिणामविशिष्टेभ्य इत्यर्थः। "ऋण मु हैवेति। स्वस्वनामोद्देशेन गृहीतं हविः ऋण मेव 'ताः' सर्वा देवता मन्यन्ते। कुत इद मवगतम्? इति चेत्, उच्यते— 'यत्काम्या' यस्य फलस्येच्छया हविर्गृह्णाति, 'तं कामं' काम्यमानं फलविशेषम् 'अस्मै' यजमानाय 'यद्' यस्मात् समर्द्धयेयुः, तेन कारणेन हविषः ऋणरूपत्व मवगत मित्यर्थः। यत्काम्येति यच्छब्दादिच्छार्थे "काम्यच्"-इति[3] काम्यच्, तदन्तात् अकारप्रत्यये[4] तृतीयाया लुक्[5]। "तस्मादिति। 'तस्मात्' हविषि देवताना मृणत्वाभिमानात्। फलप्रदानेन तत्प्रत्यर्पणार्थं तत्र देवतानाम अवश्य मादेष्टव्य मित्यर्थः।

अग्नीषोमीयादिहविरन्तरेऽपि उक्त मतिदिशति— "एव मेवेति। 'एव मेव' आग्नेयवदेव 'यथापूर्वं' यथाक्रमम्, अग्नीषोमीयादीनि 'हवींषि' गृह्णीयादित्यर्थः। अतएव मन्त्रकाण्डे आग्नेयहवि-

---

१— वा० सं० १. १०. २। का० श्रौ० सू० २. ३. २१।

२— पा० सू० २. ३. ६२. वा० १। ३— पा० सू० ३. १. ९।

४— पा० सू० ३. ३. १०२। ५— पा० सू० ७. १. ३९।

र्ग्रहणमन्त्रानन्तरम् "अग्नीषोमाभ्यां जुष्टं गृह्णामि"-इति[1] ग्रहण-मन्त्रशेष आम्नातः। कात्यायनोऽप्यसूत्रयत्— "एव मग्नीषोमीयं यथादिवत मन्यत्"-इति[2] ॥ १९ ॥

निरूपशेषस्य समन्त्रक[3] मभिमर्शनं विधत्ते— "अथेति। "तद्यत एवेति। 'तत्' तत्र शकटे 'यत एव' यस्मादेव स्थानाद् गृह्णाति, 'तदेव' तत् स्थान मेव अनेन मन्त्रेण पुनः 'आप्याययति' वर्द्धयति। 'भूताय' प्रभूताय समृद्ध्यर्थं त्वा मभिमृशामि, 'अरातये' अदानाय असमृद्धये नाभिमृशामि, इत्यस्यार्थस्य मन्त्रेण प्रतिपादनात्। सूचितं हि— "भूताय त्वेति शेषाभिमर्शनम्"-इति[4] ॥ २० ॥

अथ समन्त्रकं[5] प्रागवेक्षणं विधत्ते— "अथ प्राङिति। "परि-वृत मिव वेत्यादि। परिवेष्टित मेव खल्वनो भवति, धान्य-निधानार्थम्; तन्मध्ये अवस्थितस्याध्वर्योश्चक्षुः 'पाप्मगृहीत काचकामलादिदोषदूषितमिव द्रष्टुं न समर्थं भवति; तत्र सह-कारिण आलोकस्याभावात्। कथं तस्य दर्शनोपायः? इति, तदु-च्यते— अवेक्षणमन्त्रगत-स्वरितिशब्देन स्वर्गवाचिना तत्साधनभूतो यज्ञो ऽभिधीयते; अहरादीनि च तेन लक्षणया प्रतिपाद्यन्ते। अत एव 'स्वर्'-शब्दस्य[6] सूर्यनामत्व मुक्तं यास्केन— "स्वरादित्यो भवति। सु अरणः, सु ईरणः"-इति[7]। 'तत्' तथा सति एतन्मन्त्र-

१— वा० सं० १. १०. ३। २— श्रौ० सू० २. ३. २१, २२।
३— वा० सं० १. ११. १। ४— का० श्रौ० २. ३. २३।
५— वा० सं० १. ११. २। का० श्रौ० सू० २. ३. २४।
६— 'स्वः-शब्दस्य'-इति जादिषु। ७—निरु० २. ४. २ द्रष्टव्यम्

करणकेन प्रेक्षणेन स्वर्-शब्दप्रतिपादितं[1] यज्ञादिचतुष्टय मर्थजातं प्राच्यां दिशि प्रथमत उपलभ्यमानम् 'अतः' अस्माच्छकटस्थानात् 'अभिविपश्यति' अवलोकयति ॥ २१ ॥

अथ समन्त्रकं[2] शकटादवरोहणं विधत्ते— "अथावरोहतीति। "ते हैत इत्यादि। 'अस्य' यजमानस्य, य एषः अध्वर्युः 'यज्ञेन चरति' हविर्ग्रहणादिकं यज्ञसाधन मनुतिष्ठति, तं 'प्रयन्तं' शकटस्थानात् प्रगच्छन्तम् 'अनु'-सृत्य यजमानस्य 'ते' गृहाः 'इतः' अस्माद्भूलोकात् 'प्रच्योतोरीश्वराः' प्रच्युतिं प्राप्तुं[3] समर्थाः। तथा 'तस्य' यजमानस्य कुलं 'विक्षोभ्धोः' विक्षोभयितुं समर्थाः। "ईश्वरे तोसुन्-कसुनौ"-इति[4] च्यवतेः क्षुभेश्च तोसुन् प्रत्ययः। अनेन मन्त्रेण अवरोहन्नध्वर्युः 'तानेव' यजमानस्य गृहान् 'अस्यां' पृथिव्यां 'दृंहति' दृढीकरोति। "दृह दृहि वृद्धौ"-इति[5] धातुः। एवं सत्युक्तदोषनिवृत्ति माह— "तथेति।

निरुप्तेन हविषा सहाग्निसमीपगमनं विधत्ते— "अथ प्रैतीति। उर्विति मन्त्रस्य प्रागाम्नातं ब्राह्मणम्[6] अत्रातिदिशति[7]— "सोऽसा-विति। "अन्तरिक्षं वा अनु रक्षश्चरति"-इत्यादिको यो वाक्यशेषः, 'सोऽसावेव' अत्राम्नातस्यापि तस्य मन्त्रस्य 'बन्धुः' अनुकूलः, अतो-ऽत्राप्यनुषज्य योजनीय इत्यर्थः ॥ २२ ॥

१— 'स्वः-शब्दप्रतिपादितं'-इति ढ।
२— वा० सं० १. ११. २। का० श्रौ० सू० २. ३. २५।
३— 'प्रच्यावयितुं'-इति ढ।
४— पा० सू० ३. ४. १३।
५— धा० प०।
६— पुरस्तात् ३५, ४४ पृ० ११, ५ प० द्रष्टव्यम्।
७— का० श्रौ० सू० २. ३. २६। वा० सं० १. ११. ४।

आहृतस्य हविषः सादनं विधत्ते— "स यत्रेत्यादिना"। गार्हपत्ये आहवनीये वा यस्मिन्नग्नौ श्रपणम्, तस्य पश्चात् 'पात्रासादनं' निरुप्तस्य हविषः सादनं च कर्त्तव्य मित्यर्थः।

सादनमन्त्रगत-'नाभि'-शब्दस्याभिप्रेत मर्थं माह— "मध्यं वा इति। मनुष्यादिशरीरेषु नाभेर्मध्यदेशेऽवस्थानात् पृथिव्या नाभिरिति मध्य मेवोच्यते। तच्च मध्यम् 'अभयम्' भयरहितम्; प्रान्तदेशे हि चौरव्याघ्रादिभयम्। अतः पृथिव्याः सम्बन्धिनि राक्षसादिभयरहिते स्थाने त्वां सादयामीति मन्त्रभागस्यार्थः। "अदित्या उपस्थे"-इति मन्त्रस्य द्वितीयभागं व्याचष्टे— "उपस्थ इवेति। 'यद्' वस्तु 'सुगुप्तं' सुष्ठु रक्षितं यथा भवति तथा 'गोपायन्ति' रक्षन्ति; एतत् 'उपस्थ इव' उत्सङ्ग इव, उदरमध्य इव वा, 'अभार्षुः' स्तवन्त इति खलु वदन्ति लौकिकाः। अतस्तु यस्मिन् स्थाने सादितं हविः सुगुप्तं भवति, तत् स्थान मुपस्थशब्देन मन्त्रगतेन विवक्षितम् अभार्षुरिति "भृञ् भरणे"-इत्यस्मात्[२] लुङि सिचि वृद्धिः[३]। 'गोपायन्ति'-इति "गुपूधूपविच्छि"-इति[४] आय्-प्रत्ययः। अन्तिमं भाग माचष्टे— "अग्ने हव्य मिति। "इयं वा अदितिः"-इति[५] श्रुतेः अदितिर्हि पृथिवी; तस्याश्चाधिपतिरग्निः[६]; स चात्र गार्हपत्यरूप आहव-

---

१— वा० सं० १. ११. ५। का० श्रौ० सू० २. ३. २७।

२— धा० उ०। ३— पा० सू० ७. २. १।

४— पा० सू० ३.१.२८। ५— ऐ० ब्रा० ३. ६. ७। तै० सं० ३.२. ४.७।

६— "पतिः पृथिव्याः"—इति वा० सं० ३. १२। निरु० ७. २. १; ३. १।

बीयुक्तपो वा ; तस्मै च 'अग्नये', तेनाधिष्ठितायै 'पृथिव्यै' च रक्षणार्थम्, 'एतद्धविः' अनेन मन्त्रभागेन दत्तं भवतीत्यर्थः ॥ २१ ॥ १ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

माध्यन्दिनशतपथभाष्ये प्रथमाध्याये

द्वितीयं ब्राह्मणम्[1] ॥

१—पात्रासादनानन्तरं हविर्ध्यसहित मनो गार्हपत्यस्य पश्चात् प्राङीष मवस्थापयेत् । अनः शकटम् ; तच्च युग्मयोक्त्रसंयुक्तं वरत्रापरिवेष्टितं च स्थाप्यम् । ततोऽध्वर्युः शूर्पाग्निहोत्रहवण्यावादत्ते । तत आरभ्य हविरावपनपर्यन्तं हविष्कृदाह्वानपर्यन्तं वा अध्वर्योर्वाग्यमनम् । ततः शूर्पाग्निहोत्रहवण्योर्गार्हपत्ये प्रतपनम् । तत उदकस्पर्शनम् । ततः शकटं ति गमनम् । तत्समीपे उपवेशनम् । तस्य धुरभिमर्शनम् । ततस्तत्र स्थित एवोपस्तम्भनस्य पश्चात् उत्तरा मीषा मालभ्य मन्त्रजपः । ततः शकटस्य पश्चान्मार्गेण दक्षिणतो गत्वा दक्षिणचक्रस्योपरि आरोहति । आरुह्य व्रीहियवादीन् प्रेक्षते । ततस्तत्रत्यतृणनिरसनम् । हविरालभनम् । ततोऽपां स्पर्शनम् । पुनरपि हविरालभनम् । ततः सव्यहस्ते शूर्पं निधाय तस्योपरि उत्ताना मग्निहोत्रहवणीं निधाय प्राङासीनो मुष्ट्या हविःप्रक्षेपः । तत्र मन्त्रेण त्रिर्ग्रहणं, तूष्णीं चतुर्थम् । गृहीतं च तत् शूर्पस्य दक्षिणपार्श्वे संस्थाप्य, अपरपार्श्वेऽग्निषोमीयहविर्ग्रहणं च तथैव । शकटे यदवशिष्टं हविस्तदपि पृथक् ग्रहणीयम् । ततस्तत्रैवानस्युपविष्टः प्राचीमिक्षते । ततः शकटादवरोहणम्, गार्हपत्योत्तरस्यां गमनम् । ततस्तच्छूर्पं सहविष्कं अपणस्य पश्चात् सादयति । अपण-शब्देनात्र यस्मिन्नग्नौ हविःअपणं क्रियते, गार्हपत्यो वा आहवनीयो वा सोऽभिधीयते । तदेतत् सर्वमिह द्वितीयब्राह्मणे द्रष्टव्यम् ॥

पवित्रे करोति । पवित्रे स्थो वैष्णव्याविति यज्ञो वै विष्णुर्यज्ञिये स्थ ऽइत्येवैतदाह ॥ १ ॥

ते वै द्वे भवतः । अयं वै पवित्रं यो ऽयं पवते सो ऽय मेक इवैव पवते सो ऽयं पुरुषे ऽन्तः प्रविष्टः प्राङ् च प्रत्यङ् च ताविमौ प्राणोदानौ तदेतस्यैवानुमात्रां तस्माद् द्वे भवतः* ॥ २ ॥

अथो ऽअपि त्रीणि स्युः । व्यानो हि तृतीयो द्वे त्वेव† भवतस्ताभ्या मेताः प्रोक्षणीरुत्पूय ताभिः प्रोक्षति तद्यदेताभ्या मुत्पुनाति ॥ ३ ॥

वृत्रो ह वा ऽइदꣳ सर्वं वृत्वा शिश्ये । यदिद मन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं वृत्वा शिश्ये तस्माद् वृत्रो नाम ॥ ४ ॥

त मिन्द्रो जघान । स हतः पूतिः सर्वत एवापो ऽभिप्रसुस्राव सर्वत इव ह्ययꣳ समुद्रस्तस्माद् हैका आपो बीभत्साञ्चक्रिरे ता उपर्युपर्यतिपुप्रुविरे‡ ऽत इमे दर्भास्ता हैता अनापूयिता आपो§ ऽस्ति वा ऽइतरासु सꣳसृष्ट मिव यदेना वृत्रः पूतिरभिप्रास्रवत् तदेवासा मेताभ्यां पवित्राभ्या मपहन्त्यथ मेध्याभिरेवाद्भिः प्रोक्षति तस्माद्वा ऽएताभ्या मुत्पुनाति ॥ ५ ॥

---

* 'भवतः'—इति ख ।
† 'न्वेव'—इति च ।
‡ 'पुप्रुविरे'—इति छ, सायणसम्मतश्च ।
§ 'अपो'—इति क, ग ।

.स उत्पुनाति। सवितुर्वः प्रसव ऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतदुत्पुनात्यच्छिद्रेण पवित्रेणेति यो वा ऽअयं पवत ऽएषो ऽच्छिद्रं पवित्र मेतेनैतदाह सूर्य्यस्य रश्मिभिरित्येते वा ऽउत्पवितारो यत् सूर्य्यस्य रश्मयस्तस्मादाह सूर्य्यस्य रश्मिभिरिति ॥ ६ ॥

ताः सव्ये पाणौ कृत्वा। दक्षिणेनोदिङ्गयत्युपस्तौत्येवैना एतन्महयत्येव देवीरापो ऽअग्रेगुवो ऽअग्रेपुव इति देव्यो ह्यापस्तस्मादाह देवीराप इत्यग्रेगुव इति ता यत्समुद्रं गच्छन्ति तेनाग्रेगुवो ऽग्रेपुव इति ता यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुवो ऽग्र* ऽइम मद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुव मिति साधु यज्ञꣳ साधु यजमान मित्येवैतदाह ॥ ७ ॥

युष्मा† ऽइन्द्रो ऽवृणीत वृत्रतूर्य्ये ऽइति। एता उ हीन्द्रो ऽवृणीत वृत्रेण स्पर्द्धमान एताभिर्ह्येनं मह्नंस्तस्मादाह युष्मा‡ ऽइन्द्रो ऽवृणीत वृत्रतूर्य्ये ऽइति ॥ ८ ॥

यूय मिन्द्र मवृणीध्वं वृत्रतूर्य्ये ऽइति। एता उ हीन्द्र मवृणत वृत्रेण स्पर्द्धमान मेताभिर्ह्येनं मह्नंस्तस्मादाह यूय मिन्द्र मवृणीध्वं वृत्रतूर्य्ये ऽइति ॥ ९ ॥

---

* 'तेनाग्रेगुवो ऽग्रेपुवो ऽग्र'–इति ग। †, ‡ 'युष्माꣳ'–इति क, ख।

प्रोक्षिता स्थेति। तद्देवताभ्यो निह्नुतेऽथ हविः प्रोक्ष-त्यमेध्यो वै प्रोक्षणस्य मन्युर्मेध्य मेवैतत्करोति ॥ १० ॥

स प्रोक्षति। अग्नये त्वा जुष्टं प्रोक्षामीति तद्यस्यै देवतायै हविर्भवति तस्यै मेध्यं करोत्येव मेव यथापूर्वꣳ हवीꣳषि प्रोक्ष्य* ॥ ११ ॥

अथ यज्ञपात्राणि प्रोक्षति। दैव्याय कर्म्मणे शुन्धध्वं देवयज्यायाऽइति दैव्याय हि कर्म्मणे शुन्धति देव-यज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदꣳ व्वस्तच्छुन्धामीति तद्यदेवैषा मत्राशुद्धस्तक्षा वान्यो वामेध्यः कश्चित्परा-हन्ति तदेवैषा मेतदद्भिर्मेध्यं करोति तस्मादाह यद्वोऽशुद्धाः पराजघ्नुरिदꣳ व्वस्तच्छुन्धामीति ॥ १२ ॥ ३ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा तृतीयं)
ब्राह्मणम् ॥ १ । ३ ॥

पवित्रकरणमन्त्रगतस्य[1] वैष्णव्याविति[2] पदस्य तात्पर्य माह—"यज्ञो वा इति। वेवेष्टि व्याप्नोतीति व्युत्पत्त्या[3] यज्ञ एव विष्णुः[4]।

* 'प्रोच्य'—इति ख, च। १— वा० सं० १. १२. १।
२— 'व्यत्ययो बहुलमिति (पा० सू० ३. १. ८५.) स्त्रीत्वम्"—इति महो०।
३— निरु० १२. १. ७। निघ० ३. १७. १२।
४— "विष्णुर्वै यज्ञः"—इति तै० सं० २. १. ८. ३। ऐ० ब्रा० १. ३. ४।

तथाच मन्त्रगतस्य वैष्णव्याविति शब्दस्य, हे दर्भनाड्यौ! युवां यज्ञसम्बन्धिन्यावेव भवथ इत्यय मर्थः प्रतिपादितो भवतीत्यर्थः ॥ १ ॥

सङ्ख्यान्तरं वारयितुं पवित्रयोर्द्वित्वं विधत्ते— "ते वा इति। तदेतदुपपादयति— "अयं वा इति। 'यः' पवमानो वायुः, अय मेव 'पवित्रं' पवनसाधनम्, शुद्धिहेतुः। "पुवः संज्ञायाम्"-इति[१] करणे इत्र-प्रत्ययः। "पन्थानस्त्र विशुद्ध्यन्ति सोमसूर्यांशुमारुतैः"-इत्यादिस्मृतेः[२] वायोः शुद्धिहेतुत्वम्।

"एक इवैवेति। 'सः' च बाह्ये वर्त्तमानो वायुः, एकरूप एव वाति; 'सः' एव पुरुषशरीरानुप्रविष्टः सन् वृत्तिभेदेन 'प्राङ् च प्रत्यङ् च चरति'। इड़ापिङ्गलादिनाड़ीद्वारा वहिर्निर्गच्छन् प्राणः प्राङित्युच्यते, तयैव द्वारा पुनरन्तः प्रविशन् प्रत्यङ्ङिति; तावेतौ वृत्तिभेदौ 'प्राणोदानौ'-इत्युच्येते। तत्र प्राङ् सञ्चरन् प्राणः, 'उद्' ऊर्द्ध्वदेशात् आनयति[३] अन्तः प्रवेशानुगुणं[४] चेष्टत इति 'उदानः'। तस्य 'च'-शब्देन प्रत्यङ्मुखो ऽपानो विवक्षितः, नतूत्क्रान्तिहेतुरुदानवृत्तिरिति; तस्या ऊर्द्ध्वमुखत्वेन प्रत्यङ्मुखत्वमानुपपत्तेः[५]। अत एव तैत्तिरीयके समानप्रकरणे पवित्रयोः प्राणापानरूपत्व माम्नायते— "प्राणापानौ पवित्रे यजमान एव प्राणापानौ दधाति"-इति। एवं द्विधा भिन्नस्यैतस्यैव वाय्वाख्यस्य पवित्रस्य[६] 'मात्रां' परिमाणम्, 'अनु'-सृत्य, तत्पवित्रयोर्द्वित्वम् ॥ २ ॥

१— पा० सू० ३. २. १८५। २— वि० सं० २३. ४०।

३— 'अनिति'-इति ठ, ड। ४— 'प्रवेशानुगुण्यं'-इति ठ, ड।

५— 'प्रत्यक्त्वानुपपत्तेः'-इति ठ, ड। ६— तै० सं० ६. १. १०. २।

त्रित्वपक्ष मभ्युपन्यस्यति— "अथो ऽपि"-इति । पक्षान्तरद्योतकः 'अथोऽपि'-शब्दः ।

तत्रोपपत्तिर्व्यानो ह्रीति । मुख्यपवित्रस्य वायोः प्राणोदानवद् व्यानाख्यो वृत्तिभेदः तृतीयो 'हि' यस्माद् विद्यते[1], तस्मात् पवित्र-त्रित्व मप्युक्त मित्यर्थः ।

द्वित्वपक्ष मेव निगमयति— "द्वे त्वेवेति । "अथ यः प्राणा-पानयोः सन्धिः, स व्यानः"-इतिश्रुतेः[2] व्यानस्य सन्धिरूपतया तद्-भयानतिरिक्तत्वाद् द्वित्वपक्ष एव श्रेयानित्यर्थः । कात्यायनस्तु पक्षद्वय मपि सूत्रयामास— "कुशौ समौ वप्रशीर्णाग्रा वनन्तर्गर्भौ कुशे-श्छिनत्ति पवित्रे स्थ इति, त्रीन् वा"-इति[3] ।

अथोत्पवनं विधत्ते— "ताभ्या मिति । प्रोक्षत्याभिरिति 'प्रोक्षण्यः' आपः । करणे ल्युट्[4] । 'ताभिः प्रोक्षति'-इत्युत्पव प्रयोजनकथनम् ; न तु प्रोक्षणविधिः । यस्मादुत्पूताभिरद्भिः प्रोक्षणं कर्त्तव्यम्, तस्मात् पवित्राभ्यां तासा मुत्पवनं कार्य मित्यर्थः ।

तदेतदुत्पवनं स्तोतु मनुवदति— "तद्यदिति ॥ २ ॥

उत्पवन-निवर्त्त्या मशुद्धिं दर्शयितु मितिहास मुदाहरति— "वृत्रो हेति । 'वृत्रा शिश्ये'-इति, आवृत्य शयनं कृतवान् । शीङो[5] लिटि "एरनेकाच"-इति[6] यण् । 'द्यावापृथिवी'-इति, द्यौश्च

१— "स वा अयं प्राणस्त्रेधा विहितः प्राणो ऽपानो व्यान इति"-इति ऐ० ब्रा० २. ४. ५ ।
२— छा० उप० १. ३. ३ ।
३— श्रौ० सू० २. ३. ३२ ।
४— पा० सू० ३. ३. ११७ ।
५— अदा० आ० ।
६— पा० सू० ६. ४. ८२ ।

पृथिवी च द्यावापृथिव्यौ[1]। "अन्तरान्तरेण"-इति[2] द्वितीया। द्यावापृथिव्योर्मध्ये इत्यर्थः। वरणाद् वृत्र इति नाम[3]। निर्वक्ति—"स यदिति ॥ ४ ॥

स हत इत्यादि। पूतिर्दुर्गन्धः। सर्वत एवापोऽभिलक्ष्य प्रसुतोऽभूत्। अत एव खल्वय मपि समुद्रः, सर्वतः सर्व मावृत्य वर्त्तते। 'तस्माद्' दुर्गन्धात् सुताद् वृत्रादिमा आपो 'बीभत्साञ्चक्रिरे' जुगुप्सन्ते स्म। "मान्बधदान्शान्भ्यः"-इति[4] बधेर्वैरूप्ये सन् प्रत्ययः। बीभत्समानाः 'ताः' आपः तत्संस्पर्शं परिहर्त्तुं मुपर्य्युपरि वर्त्तमानाः 'अति पुप्लुविरे'[5] जलाशय मतिक्रम्य तीरदेशं प्राप्ता आसन्। "प्लुङ् गतौ"-इति[6] धातुः। प्लुताश्च 'ताः' आपो दर्भात्मना परिणताः। अय मर्थः तैत्तिरीयकेऽपि विस्पष्ट माम्नातः—"इन्द्रो वृत्र मह॒न्॒ोऽपोऽभ्यं म्रियत, तासां यन्मेध्यं यज्ञियं सदेव मासीत्; तदपोदक्रामत्, ते दर्भा अभवन्"-इति[7]। "अनापूयिता इति। 'आ' समन्तात् पूयं दौर्गन्ध्यं प्राप्ताः आपूयिताः, न आपूयिताः

१— पा० सू० ६. ३. ३०। २— पा० सू० २. ३. ४।

३— "वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा"-इत्यादि निरु० २. ५. १। "तत् को वृत्रः? मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः, अपाञ्च ज्योतिषञ्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"-इत्यादि च तत्रैव २. ५. २। "यदिमाँल्लोकानवृणोत्, तद् वृत्रस्य वृत्रत्वम्"-इति तै० सं० २. ४. १२. २।

४— पा० सू० ३. १. ६।

५— "पप्लुविरे"-इति ढ। मूले तु "पुप्लुविरे"-इत्येव सर्वपुस्तकेषु।

६— धा० पा० ९५८। ७— तै० ब्रा० ३. २. ५. १।

'अनापूयिताः'। "पूयी विशरणे, दुर्गन्धे च"-इत्यस्मात्[1] कर्त्तरि निष्ठायां छान्दस इट्। यद्वा 'आ' समन्तात् पूयमानं सञ्जात मिति 'आपूयिताः'। "तदस्य सञ्जातम्"-इति[2] तारकादित्वादितच्। 'इतरासु'-इति, दर्भात्मना परिणतजलव्यतिरिक्तासु; अमेध्यत्वा-पादकं किञ्चित् संसृष्ट मिव भवति। अत्र हेतुः— "यदेना इति। एव मनापूयिताव्विकारदर्भमयाभ्यां पवित्राभ्याम् 'आसाम्' अपा मुत्पवनं कुर्वन् पूयसंसर्गकृतं 'तत्' अमेध्यत्व मपहन्ति। ततश्च विधास्यमानं प्रोक्षणञ्च 'मेध्याभिः' मेधार्हाभिः शुद्धाभिरेवाद्भिः कृतं भविष्यतीत्यर्थः। 'तस्मात्'-इत्युत्पवननिगमनम् ॥ ५ ॥

विहित मुत्पवन मनूद्य मन्त्रं विधत्ते— "स इति। सविता वा इत्यादि पूर्ववत्[3]।

अच्छिद्रशब्दार्थ माह— "यो वा इति। योऽयं वायुः पवते, ए खल्वविच्छेदेन सर्वत्र वर्त्तमानात् छिद्ररहितं पवनसाधनम्। "एते वा इति। 'एते' सूर्यस्य रश्मयः, 'उत्' उत्कृष्टं 'पवितारः' शोधकाः; अतस्तैः करणभूतैरुत्पवनं युक्त मित्यर्थः ॥ ६ ॥

उत्पवनानन्तरं कर्त्तव्यं विधत्ते— "ता इति। 'ताः' प्रोक्षणीरपः अग्निहोत्रहवण्या पात्रेण साकं सव्ये पाणौ धारयन् "देवीरापः"-इति[4] मन्त्रेण दक्षिणेन हस्तेन 'उदिङ्गयति' ऊर्द्ध्वं सेचनेन चाल-यति[5]। "इगि-रिगि-लिगि गत्यर्थाः"-इति धातुः[6]। मन्त्रतात्पर्य

१— धा०पा० ४८४। २— पा० सू० ५.२.३६। ३— ५४ पृ० द्रष्टव्यम्।
४— वा० सं० १.१२.३। का० श्रौ० सू० २.३.३५।
५— उपरिष्टाच्च (१२.५.१.१२.) द्रष्टव्यम्। ६— धा०प०१५३-१५५।

माह—"उपस्तौतीति । 'एतत्' एतेन, देवीराप इतिमन्त्रपठनेन 'एनाः' अपः प्रशंसत्येव । तेन च प्रशंसनेन 'महयति' पूजयत्येव ।

कस्तर्ह्यासां स्तावकस्तथाविधो मन्त्र इति तं दर्शयति—"देवीरिति[1] । स्तुतिरूपता मुपपादयति—"देव्य इत्यादिना । अपां देवतारूपत्वेन देवीत्वं प्रसिद्ध मिति 'हि'-शब्दार्थः । "ता यदित्यादि । 'अग्रे' पुरतो वर्त्तमानं समुद्रं गच्छन्तीति 'अग्रेगुवः' । अग्रेगू-शब्दस्य समुद्रगामित्वं विवक्षित मिति भावः । "ऊङ् च गमादीनाम्"-इति[2] गमेरूकारः । "ता यत्प्रथमा इति । आपः खल्वभिषवार्थ मामिच्यमाना यष्टव्यदेवताभ्यः पूर्वं सोमरस मास्वादयन्ति, तेन सोमपानेन 'अग्रे' प्रथमं स्वात्मानं पुनन्तीति 'अग्रेपुवः'[3] । उभयत्र "तत्पुरुषे कृति बहुलम्"-इति[4] अग्रशब्दात् सप्तम्या अलुक् ।

"साधुयज्ञ मित्यादि । "अग्र इमम्"-इत्यत्र 'अग्र'-शब्दः प्राशस्त्यवाची । 'अग्रे' प्रशस्ते 'अद्य' अस्मिन् काले 'इमं' यज्ञं प्रापयतेति प्रतिपादयता मन्त्रेण 'साधु यज्ञं नयत'-इत्येवोक्तं भवति ; प्राशस्त्यं प्राप्तस्य साधुत्वनियमात् । यज्ञस्य पतिः यज्ञपतिः, त मिति । यज्ञशब्देन यजमानो विवक्षित इति व्याचष्टे—"साधु यजमान मिति । अत्रापि पूर्ववत् 'अग्रे'-शब्द-व्याख्यानम् । साध्विति विशेषणम् ॥ ७ ॥

१— वा० सं० १. १२. ३ । "आपो देवीर्"-इत्यादिः तैत्तिरीयपाठः (तै० सं० १. १. ५. २.—ब्रा० ३. २. ५.) ।

२— पा० सू० ६. ४. ४०. वा० १, २ । अनुनासिकलोपस्यैतेनैव ।

३— पुनातिश्च गमादिरन्तर्गतः । ४— पा० सू० ६. ३. १४ ।

युष्मा इन्द्र इति[1]। हे आपः! युष्मान् वृत्रं हन्तुकामः इन्द्रः साहाय्यकरणार्थं प्रार्थयामास। ताश्च यूयं वृत्रशरीरनिरुद्धाः[2] विस्रम्भगमनार्थं वृत्रं हन्तुम् इन्द्रं प्रार्थितवत्यः। अत ईदृग्विधं परस्परप्रार्थनं युष्मा इन्द्र इत्यादिना मन्त्रभागेन[3] प्रतिपाद्यत इत्यर्थः ॥ ८ ॥ ९ ॥

"तदेताभ्य इति। यद्यपि प्रोक्षणीना मपां स्वातिरिक्तजलेन शुद्ध्यर्थं प्रोक्षणं नास्ति, तथापि "प्रोक्षिता स्थ"-इति[4] स्वात्मनैव प्रोक्षिता भवतेति मन्त्रेण प्रतिपादनात् प्रोक्षणत्वसिद्धेः 'तत्' तेन मन्त्रपाठेन अप्रोक्षणजनित मपराधम् 'एताभ्यः' प्रोक्षणीभ्यो 'निह्नुते' अपनयति। प्रोक्षणपात्रगतेनैवोदकेन तत्पात्रगत मुदक मनेन मन्त्रेण प्रोक्षितव्य मिति तात्पर्यार्थः[5]। अत एवोक्तं सूत्रकृता,

१— 'युष्माँ इन्द्र'-इति क। मन्त्रश्चेषः- वा० सं० १. १३. १। तत्र "युष्मा = युष्मान्, अवृणीत। आकारश्छान्दसः"-इति महो०। "युष्मानिन्द्रो"-इति तैत्तिरीयपाठः (सं०१.१.५.—ब्रा०३.२.५.)।

२ — "वृत्रसेनानिरुद्धाः"-इति ज, झ, ञ, ट।

३— यद्यप्ययं संहितायां कण्डिकान्तरगतत्वात् पृथक् मन्त्र एव बुध्यते, तथाप्येतद्ब्राह्मणविधितो देवीरापइतिमन्त्रस्यैवांशविशेष इति स्वीकार्यः; अत एव नास्य विनियोगान्तरं दर्शितं कात्यायनेन।

४— 'प्रोक्षिताः स्थ'-इति ठ। मन्त्रश्चेषः- वा० सं० १. १३. २।

५— 'तत् तेन'-इत्यारभ्य 'तात्पर्यार्थः'-इत्यन्तस्य स्थाने "प्रोक्षणपात्र-गतेनैवोदकेन तत्पात्रगत मुदकं प्रोक्षयित्वा 'तत्' तेन मन्त्रपाठेन प्रोक्षणजनित मपराध मेताभ्यः प्रोक्षणीभ्यो 'निह्नुते' अपनयति"-इति ढ।

कात्यायनेन— "प्रोक्षिता स्थेति तासां प्रोक्षणम्"-इति[1]। तैत्तिरीयश्रुतिस्तु एतन्मन्त्रपठन मेवासां प्रोक्षणं मेने। यदाह— "प्रोक्षिता स्थेत्याह तेनापः प्रोक्षिताः"-इति[2]।

एवं संस्कृताभिरद्भिर्हविषः प्रोक्षणं विधत्ते— "अथ हविरिति। वक्ष्यमाणस्य हविःप्रोक्षणविधिशेषार्थवादस्य सर्वप्रोक्षणविधिसाधारण्य माह— "एको वा इति। 'बन्धुः' अनुकूलं स्तावक मर्थवादवाक्यम्[3], सर्वस्यापि प्रोक्षणस्य 'एको वै' एकविध मेव; अतस्तत् सर्वत्र योजनीय मिति भावः। किम्पुनस्तदित्याह— "मेध्य मिति ॥ १० ॥

विहितं प्रोक्षण मनूद्य मन्त्रं विधत्ते— "स प्रोक्षतीति। "अग्नय इति[4]। मन्त्रे देवतादेशनस्य प्रयोजन माह— " तद्यस्या इति।

उक्त मन्यत्रातिदिशति— "एव मिति। 'एवम्' अनेनैव प्रकारेण यस्यै' देवतायै हविर्गृहीतं भवति, तत्तन्नाम चतुर्थ्यन्तेनादिशेदित्यर्थः ॥ ११ ॥

हविःप्रोक्षणानन्तरं यज्ञपात्राणां समन्त्रकं प्रोक्षणं विधत्ते— "अथेति। "दैव्यायेति[5]। देवाना मिदं 'दैव्यम्'। "देवाद् यञ्ञौ"-इति प्राग्दीव्यतीयो यञ्[6]। 'शुन्धति' शोधयति। 'शुन्ध विशुद्धौ"-इति[7] धातुः। 'देवयज्यायै'-इति, देवयजनरूपाय कर्मणे

१— का० श्रौ० २. ३. ३६। २— ब्रा० ३. २. ५ (सं० १. १. ५. ३.)।

३— ३९ पृ० १६ पं०, ५७ पृ० १६ पं० द्रष्टव्यम्।

४— वा० सं० १. १३. ४, ५। का० श्रौ० सू० २. ३. ३७, ३८।

५— वा० सं० १. १३. ६। का० श्रौ० सू० २. ३. ३९।

६— पा० सू० ४. १. ८५. वा० २. (पा० सू० ४. १. ८३.)।

७— धा० प० ७४।

इत्यर्थः। मन्त्रस्यापरभाग मनूद्य व्याचष्टे—"यद इति"। 'तक्षा' वर्द्धकिः, 'अन्यः' तद्व्यतिरिक्तो वृषलादिः; स सर्वोऽप्यशुद्धत्वात् 'अमेध्यः'। तत्संस्पर्शकृतं यत् 'तत्' 'एषां' पात्राणां दोषजातम्, 'एतत्' अनेन प्रोक्षणेनैषां निवर्तयन्, 'तत्' सर्वं पात्रं यज्ञार्हं करोति। अत ईदृग्विधस्यार्थस्य प्रत्यायनाय यद इति मन्त्रभागः पठितव्य इत्युपसंहरति—"तस्मादिति। 'पराजघ्नुः'-इति, पराहतं दूषितं चक्रुरित्यर्थः॥ १२॥ २॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये प्रथमाध्याये
तृतीयं ब्राह्मणम्[१]॥

१— अस्मिन् तृतीये ब्राह्मणे पूर्वं पवित्रच्छेदनं विहितम्। तत्तु सम-प्रमाणयोः साग्रयोः अनन्तर्गर्भयोः अच्छरिताग्रयोः कुशयोः क्षुरिका-स्थानीयैः कुशैरेव छेदनम्। ततोऽग्निहोत्रहवण्यां स्वय मेवोदक मासिच्य ताभ्यां पवित्राभ्या मपा मुत्पवन मुत्क्षेपणम्। तयोः पवित्रयोस्तत्रैवाग्नि-होत्रहवण्यां स्थापनम्। ततः सव्यहस्ते अग्निहोत्रहवणीं निधाय सव्य-हस्तस्या मेव संलग्ना मेव दक्षिणहस्तेन 'उदिङ्गनम्' ऊर्द्ध्वं चालनम्। तत-स्ताभिरेव स्रुक्स्थाभिः तासा मेव प्रोक्षणम्। ततो 'ब्रह्मन् हविः प्रोक्षामि?' इति ब्रह्माणं पृच्छति; ब्रह्मा च 'प्रोक्ष यज्ञं धेहीत्यन्त मुपां-शूक्त्वा 'ओं प्रोक्ष'–इत्युच्चैः प्रसौति (२. २. १०.)। ततोऽध्वर्युः अग्निहोत्र-हवण्याः उदक मादाय शूर्पस्थे हविषी प्रोक्षति। तत्र अग्नये प्रथमम्, अग्नीषोमाभ्यां द्वितीयम्। ततः सर्वाणि सहैव प्रोक्षति। एतच्च प्रोक्षणं बहूदक मादाय कार्यम्। प्रतिपात्रं प्रोक्षणावृत्तिपक्षस्तु युक्ततर इति याज्ञिकदेवः। ततोऽसञ्चरे प्रणीताहवनीययोरन्तराले, गार्हपत्याहवनीय-योरन्तराले वा प्रोक्षणीनां निधानं कार्य मिति दिक्।

अथ कृष्णाजिन मादत्ते। यज्ञस्यैव सर्वत्वाय यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार तस्य देवा अनुविद्य त्वच मेवावच्छायाजह्रुः* ॥ १ ॥

तस्य यानि शुक्लानि च कृष्णानि च लोमानि। तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नाᳪ रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नाᳪ रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणीव हरीणि तानि यजुषाᳪ रूपम् ॥ २ ॥

सैषा त्रयी विद्या यज्ञः। तस्या एतच्छिल्प मेष वर्णस्तदेतत् कृष्णाजिनं भवति यज्ञस्यैव सर्वत्वाय तस्मात् कृष्णाजिन मधि दीक्षन्ते यज्ञस्यैव सर्वत्वाय तस्मादध्यवहनन मधिपेषणं भवत्यस्कन्नᳪ हविरसदिति तद्यदेवात्र तण्डुलो वा पिष्टं वा स्कन्दात् तद्यज्ञे यज्ञः प्रतितिष्ठादिति तस्मादध्यवहनन मधिपेषणं भवति ॥ ३ ॥

अथ कृष्णाजिन मादत्ते शर्म्मासीति चर्म वा ऽएतत् कृष्णस्य तदस्य तन्मानुषᳪ शर्म देवत्रा तस्मादाह शर्म्मासीति तदवधूनोत्यवधूतᳪ रक्षोऽवधूता अरा-

---

* 'मेवावत्सायाजह्रुः'—इति च (M.)।

तय इति तन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्त्यतिनुत्येव प्राचाण्युवधूनोति यद्वस्यामेध्य मभूत् तद्वस्यैतदव-धूनोति ॥ ४* ॥

तत्प्रतीचीनग्रीव मुपस्तृणाति। अदित्यास्त्वगसि प्रति त्वादितिर्व्वेत्त्विति इयं वै पृथिव्यदितिस्तस्या ऽअस्यै त्वग्यदिद मस्या मधि किञ्च तस्मादाहादित्यास्त्वग-सीति प्रति त्वादितिर्व्वेत्त्विति प्रति हि स्वः सञ्जानीते तत्सञ्ज्ञा मेवैतत् कृष्णाजिनाय च व्वदति नेदन्योन्यꣳ हिनसात ऽइत्यभिनिहित मेव सव्येन पाणिना भवति ॥ ५ ॥

अथ दक्षिणेनोलूखल माहरति। नेदिह पु नाष्ट्रा रक्षाꣳस्या विशानिति ब्राह्मणो हि रक्षसा मपहन्ता तस्मादभिनिहित मेव सव्येन पाणिना भवति ॥ ६ ॥

अथोलूखलं निदधाति। अद्रिरसि व्वानस्पत्या ग्रावासि पृथुबुध्न इति वा तद्यथैवादः सोमꣳ राजानं ग्रावभिरभिषुण्वन्त्येव मेवैतदुलूखलमुसलाभ्यां दृष-दुपलाभ्याꣳ हविर्यज्ञ मभिषुणोत्यद्रय इति वै तेषा मेकं नाम तस्मादाहाद्रिरसीति व्वानस्पत्य इति व्वान-

---

* एतदुत्तरं सर्वेष्वेव मूलपुस्तकेषु "अर्द्धप्रपाठकः"—इति लेखो विद्यते।

स्पत्यो ह्येष ग्रावासि पृथुबुध्न इति ग्रावा ह्येष पृथुबुध्नो ह्येष प्रति त्वादित्यास्त्वग्वेत्त्विति तत्कृष्णा मेवैतत् कृष्णाजिनाय च वदति नेदन्योन्यꣳ हिनसात ऽइति* ॥ ७ ॥

अथ हविरावपति । अग्नेस्तनूरसि वाचो विसर्जन मिति यज्ञो हि तेनाग्नेस्तनूर्वाचो विसर्जन मिति यां वा ऽअमूꣳ हविर्ग्रहीष्यन् वाचं यच्छत्यत्र वै तां विसृजते तद्यदेता मत्र वाचं विसृजत ऽएष हि यज्ञ उलूखले प्रत्युष्ठादेष हि प्रासारि तस्मादाह वाचो विसर्जन मिति ॥ ८ ॥

स यदिदं पुरा मानुषीं वाचं व्याहरेत् । तत्रो वैष्णवी मृचं वा यजुर्वा जपेद् यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिर्देववीतये त्वा गृह्णामीति देवानवदित्यु हि हविर्गृह्यते† ॥ ९ ॥

अथ मुसल मादत्ते । बृहद्ग्रावासि वानस्पत्य इति बृहद्ग्रावा ह्येष वानस्पत्यो ह्येष तदवदधाति स इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्वेति स इदं देवेभ्यो हविः सꣳस्कुरु साधुसꣳस्कृतꣳ सꣳस्कुर्वित्येवैतदाह ॥ १० ॥

---

* 'ऽइति'—इति ख, च ।   † 'हविर्गृह्यते'—इति ख, च ।

अथ हविष्कृत मुद्वादयति। हविष्कृदेहि 'हविष्कृदेहीति व्वाग्वै हविष्कृद् व्वाच मेवैतद् व्विसृजते व्वागु वै यज्ञस्तद्यज्ञ मेवैतत् पुनरुपह्वयते ॥ ११ ॥

तानि वा ऽएतानि। चत्वारि व्वाच एहीति ब्राह्मणस्या गच्छा द्रवेति वैश्यस्य च राजन्यबन्धोश्चाधावेति शूद्रस्य स यदेव ब्राह्मणस्य तदाहैतद्धि यज्ञियतम मेतद् ह वै व्वाचः शान्ततमं यदेहीति तस्मादेहीत्येव ब्रूयात् ॥ १२ ॥

तद्ध स्मैतत्पुरा। जायैव हविष्कृदुपोत्तिष्ठति तदिद मप्येतर्हि य एव कश्चोपोत्तिष्ठति स यत्रैष हविष्कृत मुद्वादयति तदेको दृषदुपले समाहन्ति तद्यदेता म् व्वाचं प्रत्युद्वादयन्ति ॥ १३ ॥

मनोर्ह वा ऽऋषभ आस। तस्मिन्नसुरघ्नी सपत्नघ्नी व्वाक् प्रविष्टा स तस्य ह स्म श्वसथाद्रवथादसुररक्षसानि मृद्यमानानि यन्ति ते हासुराः समूदिरे पापं वत* नोऽयमृषभः सचते कथं न्विमं दभ्नुयामेति किलाताकुली ऽइति हासुरब्रह्मावासतुः ॥ १४ ॥

तौ होचतुः। श्रद्धादेवो वै मनुरावं नु व्वेदावेति

---

* 'बत'—इति क, ख।

तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनेनर्षभेणेति तथेति तस्यालब्धस्य सा व्वागुपचक्राम ॥ १५ ॥

सा मनोरेव जायां मनावीं प्रविवेश । तस्यै ह स्म यत्र व्वदन्त्यै शृण्वन्ति ततो ह स्मैवासुररक्षसानि मृद्यमानानि यन्ति ते हासुराः समूदिर ऽइतो वै नः पापीयः सचते भूयो हि मानुषी व्वाग् वदतीति किलाताकुली हैवोचतुः श्रद्धादेवो वै मनुराव न्वेव व्वेदावेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनयैव जाययेति तथेति तस्या ऽआलब्धायै सा व्वागुपचक्राम ॥ १६ ॥

सा यज्ञ मेव यज्ञपात्राणि प्रविवेश । ततो हैनां न शेकतुर्निर्हन्तुᳫं सैषासुरघ्नी सपत्नघ्नी* व्वागुद्वदति स यस्य हैवं विदुष एता मत्र व्वाचं प्रत्युद्वादयन्ति पापीयाᳫंसो हैवास्य सपत्ना भवन्ति ॥ १७ ॥

स समाहन्ति । कुक्कुटोऽसि मधुजिह्व इति मधुजिह्वो वै स देवेभ्य आसीद् विषजिह्वो ऽसुरेभ्यः स यो देवेभ्य आसीः स न एधीत्येवैतदाहेष मूर्ज मावद त्वया व्वयᳫं सङ्घातᳫं सङ्घातं जेष्मेति नात्र तिरोहित मिवास्ति† ॥ १८ ॥

* नास्त्येतत् पदं च-पुस्तके । † 'मिवास्ति'—इति ख ।

अथ शूर्पमादत्ते। वर्षवृद्धमसीति वर्षवृद्धꣳ ह्येतद् यदि नडानां यदि वेणूनां यदीषीकाणां वर्षमु ह्येवैता वर्द्धयति ॥ १९ ॥

अथ हविर्निर्वपति। प्रति त्वा वर्षवृद्धं वेत्त्विति वर्षवृद्धा उ ह्येवैते यदि व्रीहयो यदि यवा वर्षमु ह्येवैतान् वर्द्धयति* तत्संज्ञामेवैतच्छूर्पाय च वदति नेदन्योऽन्यꣳ हिनसात इति ॥ २० ॥

अथ निष्पुनाति। परापूतꣳ रक्षः परापूता अराातय इत्यथ तुषान् प्रहन्त्यपहतꣳ रक्ष इति तन्नाष्टा एवैतद्रक्षाꣳस्यतोऽपहन्ति† ॥ २१ ॥

अथापविनक्ति। वायुर्वो विविनक्त्वित्ययं वै वायुर्योऽयं पवत एष वा इदꣳ सर्वं विविनक्ति यदिदं किञ्च विविच्यते तदेनानेष एवैतद्विविनक्ति स यदैत एतत्रापवन्ति यच्चैनानध्यपविनक्ति ॥ २२ ॥

अथानुमन्त्रयते। देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण‡ पाणिना सुप्रतिगृहीता असन्नित्यथ त्रिः फलीकरोति त्रिवृद्धि यज्ञः ॥ २३ ॥

* 'वर्द्धयति'—इति ख, ग।

† '०ऽस्यपहन्ति'—इति क। पूर्वत्राप्येवं गतम् २५ पृ० १० पं०।

‡ 'प्रतिगृह्णात्वच्छिद्रेण'—इति ग।

तद्धैके देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्व मिति फली-कुर्वन्ति । तदु तथा न कुर्यादादिष्टं वा ऽएतद्देवतायै हविर्भवत्यथैतद्वैश्वदेवं करोति यदाह देवेभ्यः शुन्धध्व मिति तत्समदं करोति तस्मादु तूष्णी मेव फली-कुर्यात् ॥ २४ ॥ ४ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा चतुर्थं) ब्राह्मणम् ॥ १ । ४* ॥

अथ निरुप्तव्रीहियवावहननार्थं[1] कृष्णाजिनादानं विधत्ते—"अथेति । 'सर्वत्वाय'-इति, अवयवकार्त्स्न्यायेत्यर्थः । कथं कृष्णा-जिनादानेन यज्ञस्य कार्त्स्न्यं मित्येतदुपपादयितुं पुरावृत्त मुदा-हरति—"यज्ञो हेत्यादिना । 'कृष्णो भूत्वा'-इति, कृष्णमृगस्य रूप मास्थाय । 'अवच्छाय'-इति, अपच्छिद्येत्यर्थः । "छो छेदने"-इत्य-स्मात्[2] क्त्वो ल्यप्[3] ॥ १ ॥

तस्य कृष्णाजिनस्य यज्ञरूपतां वक्तुं त्रयीमयत्वं प्रतिपादयति—"तस्य यानीत्यादिना । शुक्लकृष्णलोम्नां मध्वहात् ऋक्सामात्मकता मुक्त्वा विभज्यापि दर्शयति—"तस्य यानि शुक्लानीति । 'यदि वा'-इति पक्षान्तरकथनम् । 'इतरथा' उक्तवैपरीत्येनेत्यर्थः । तदेव

---

* सायणाचार्यमतेऽत्रैव प्रथमपरिच्छेदसमाप्तिः, एतत्कृतपर्यायपरिच्छे-दस्य चाध्याय इति व्यपदेशः सर्वत्र ; मूलग्रन्थे तु सर्वत्रैव प्रपाठक इति, न चात्र प्रथमप्रपाठकसमाप्तिः । एव मुत्तरत्रापि ।

१— 'निरुप्तव्रीह्यवहननाय'-इति ङ ।　२— दि० प० ४० ।

३— पा० सू० ७. १. ३७ ।

दर्शयति—"यान्येवेति। एवं कृष्णाजिनस्य ऋक्सामरूपता मुक्त्वा यजूरूपत्व मप्याह— "यान्येव बभ्रूणीति। पिङ्गलवर्णानीव यानि लोमानि 'हरीणि'[1] हरितवर्णानि, तानि यजुषां रूपम्[2] ॥ २ ॥

अस्त्वेवं ऋक्सामयजुरात्मकत्वं कृष्णाजिनस्य, तदादानेन कथं यज्ञस्य कार्त्स्न्य मित्यत आह—"सैषेति। येषा ऋग्यजुस्सामात्मिका त्रयीविद्या, सैव यज्ञः; तत्साध्यत्वात्। य एष शुक्लकृष्णादिलक्षणो वर्णः, एतत्तस्याः त्रय्या उक्तरीत्या 'शिल्पं' चित्रं रूपम्। अत एवोपरिष्टात् सोमप्रकरणे मन्त्र आम्नायते— "ऋक्सामयोः शिल्पे स्थः"-इति[3]। एव मपक्रान्तस्य यज्ञरूपस्य कृष्णाजिनस्य आदानं यज्ञस्य कार्त्स्न्याय भवतीत्यर्थः। "कृष्णाजिन मधि दीक्षन्ते"-इति। यस्मा-देवं कृष्णाजिनं त्रयीरूपत्वेन यज्ञरूपम्, 'तस्मात्' सोमाङ्गभूता दीक्षापि कृष्णाजिनस्योपरि क्रियते। कृष्णाजिनादानस्य प्रयोजना न्तर माह—"तस्मादधीति। 'अधि' उपर्यर्थः। कृष्णाजिनस्योपरि अवहननं पेषणञ्च कर्त्तव्यम्। तथा सति तद्धविः 'अस्कन्नं' स्कन्न-रहितम् 'असद्' भवेदिति। बुद्ध्या यदि भूम्या मेवावहननादिकं कुर्यात्, तदा तस्य हविषो ऽवश्यं स्कन्नदोष इत्यभिप्रायः। एतदेव विवृणोति—"तद्यदेवेति। अवहननसमये तण्डुलो वा पेषणसमये पिष्टं वात्र कृष्णाजिने 'यदि' नाम 'स्कन्दात्' स्कन्देत्। लेट्यडा-गमः[4]। 'तत्' तदा यज्ञे एव यज्ञः प्रतितिष्ठेत्, न तु तस्य स्कन्नदोष इत्यर्थः ॥ ३ ॥

१— 'हरीणीव'-इति मादिषु। २— तै० सं० १, २, २, ७।
३— वा० सं० ४. ९. १। ४— पा० सू० ३, ४. ९४।

उक्त मादान मनूद्य मन्त्रं विधत्ते[१]— "अथेति। मन्त्रगत-'शर्म'-शब्दस्य तात्पर्य माह— "चर्म वा इति। यत् 'एतत्' कृष्णस्य 'चर्म' अजिनम्, 'अस्य' यज्ञस्यैतदजिनं 'तत्' लोकप्रसिद्धचर्मशब्दाभिधेयं सत् 'मानुषं' मनुष्यसम्बन्धि रूपं भवति। एतदेव 'देवत्रा' देवेषु, सुखकरत्वात् शर्मेत्युच्यते। अतो वैदिके कर्मणि 'शर्मासीति' तत्स्तुतिरुपपन्ना। देवत्रेति "देवमनुष्येत्यादिना सप्तम्यर्थे त्रा-प्रत्ययः[२]।

उपात्तस्य कृष्णाजिनस्यावधूननं विधत्ते— "तदवधूनोतीति[३]। "तस्मान्ना इति। 'तत्' तेन समन्त्रकावधूननेन। गत मन्यत्[४]।

कृष्णाजिनवत् प्रसक्त मवधूननं पात्राणां निषेधति— "न त्वेवेति। न केवल मवधूननस्य रक्षोपहनन मेव प्रयोजनं किन्तु अयज्ञियविक्षेपोऽपीत्याह— "यज्ञस्येति। रक्षःप्रभृतिसम्पर्कात् यत् खलु 'अस्य' कृष्णाजिनस्य 'अमेध्यं' मेधानर्हं मयज्ञियरूप मभूत्, तदेवास्यैतेन मन्त्रेण 'अवधूनोति' निरस्यति ॥ ४ ॥

तस्य समन्त्रकं प्रकारविशिष्टं स्तरणं विधत्ते[५]— "तदिति। 'प्रतीचीना' प्रत्यग्दिशि स्थिता ग्रीवा यथा भवति तथा।

इयं वा इत्यादि। 'दितिः' खण्डनं न विद्यते अस्या इति[६] व्युत्पत्त्या अत्र मन्त्रगतादितिशब्देन इय मेव पृथिवी विवक्षिता;

१— वा० सं० १. १४. १। का० औ० सू० २. ४. १।

२— पा० सू० ५. ४. ५६।

३— वा० सं० १. १४. २। का० औ० सू० २. ४. २।

४— ४४ पृ० १ पं० द्रष्टव्यम्।

५— वा० सं० १. १४. ३। का० औ० सू० २. ४. ३।

६— निघ० १. १. १४, निरु० ४. ४. १ द्रष्टव्यम्।

कथ मन्यदीया त्वगन्यस्य त्वग्भवतीत्याशङ्क्याह— "तस्या इति। 'अस्यां' भूम्याम् 'अधि' उपरिभागे 'यदिदं किञ्च' कि मपि वस्त्ववस्थितम् 'तस्यै अस्यै' पृथिव्यै, सा 'त्वक्' कृष्णाजिन मप्युपर्यवस्थानात् तस्या एव त्वगिति स्तुतिः। मन्त्रस्य द्वितीयं भाग मनूद्य व्याचष्टे— "प्रतीति। 'स्वः' स्वकीयो जनः आत्मीयं जनं प्रति 'सञ्जानीते' परस्परानुकूल्यं प्रकटयितुं सञ्ज्ञां करोति। 'तत्' तथा कृष्णाजिनभूम्योः समानज्ञानता मेवायं मन्त्रभागो वदति। सञ्ज्ञानस्य प्रयोजन माह— "नेदिति। परस्परानुकूल्यज्ञानाभावे ह्यन्य मन्यो हिंस्यात्। नैव तादृशी अन्योऽन्यहिंसा भवत्वित्यनेनाभिप्रायेणेत्यर्थः।

उलूखलनिधानपर्यन्तं कृष्णाजिनस्यानुत्सर्जनं विधत्ते— "अभिनिहित मिति ॥५॥

सव्येन स्पृशतो ऽभिप्राय माह— "नेदिति। यदि ह्युलूखलनिधानात् प्रागेव कृष्णाजिनस्पर्श मुत्सृजेत्, 'तत्' तदा 'इह' अस्मिन् कृष्णाजिने राक्षसादिकं प्रविशेत्, तन्नैव भवत्विति। 'विशान्'-इति विशतेर्लेटि बहुवचने आडागमः[१] इरन्तादेशे[२] "इतश्च लोपः"-इतीकारलोपः[३]।

ननु स्पर्शेऽपि उलूखलनिधानात् पुरा कुतो रक्षांसि न प्रविशन्ति तत्राह— "ब्राह्मण इति। 'हि' यस्माद् ब्राह्मणो रक्षसा मपहन्ता मन्त्रप्रभावेन, तस्मात् तेन स्पृश्यमानं राक्षसादिर्न प्रवेष्टुं शक्नोतीति भावः ॥ ६ ॥

१— पा० सू० ३. ४. ९४।　२— पा० सू० ७. १. २।
३— पा० सू० ३. ४. ९७।